भावार्थ—जलादि अवयवादि द्रव्यों के रूपादि गुणों का आधार द्रव्यों के नाश से ही नाश होता है। नकि विरोधी दूसरे गुणों से भी॥ ५॥

अवाद्यवयविरूपादय आश्रयनाशादेव नश्यन्ति न तु विरोधिगुणान्तरादपीत्यर्थः ॥ ५ ॥

ननु पृथिव्यामवयविरूपायामपि रूपादयोऽग्निसंयोगादेवोत्पद्यन्ते नश्यन्ति च, तत् कथमाश्रयनाशमात्रनाश्या इत्यत आह—

कारणगुणपूर्वकाः पृथिव्यां पाकजाः ॥ ६ ॥

पाकजा इति। रूपरसगन्धस्पर्शा इत्यर्थः। कारणगुणपूर्वका इति। रूपाश्रयस्य घटादेर्यत् समवायिकारणं कपालादि तद्गुणपूर्वकाः। तथाच कपालरूपं कारणैकार्थसमवायप्रत्यासत्त्या घटरूपाद्यसमवायिकारणम्। एवं रसादावपि। रूपरसगन्धस्पर्शाः रूपत्वादिगुणत्वसाक्षाद्व्याप्यजातिमन्तः।

ननु चक्षुर्ग्राह्यत्वमेव रूपत्वमुपाधिरिति चेत् इन्द्रियपातमात्रेण रूपमिति

उपस्कार—जल तेज आदि अवयवि द्रव्यों के रूप, रस आदि गुण आधार-द्रव्य के नाश से ही नष्ट होते हैं, नकि दूसरे विरोधी गुण से नष्ट होते हैं ॥ ५ ॥

अवयविद्रव्यरूप पृथिवी में भी रूप, रस आदि गुण अग्नि के संयोग से उत्पन्न होते हैं और नष्ट भी होते हैं, तो केवल आधारद्रव्य के नाश से ही रूपादि गुणों का नाश होता है यह नियम कैसे हो सकता है, इस शंका के समाधानार्थ सूत्रकार कहते हैं—

पदपदार्थ—कारणगुणपूर्वकाः = समवायिकारण गुण के अनुसार होते हैं, पृथिव्यां = घटादि पृथिवी द्रव्य में जो, पाकजः = अग्निसंयोग से बदलते हैं ॥ ६ ॥

भावार्थ—पृथिवी में रूप, रस, गन्ध तथा स्पर्शस्वरूपविशेष गुण अग्निसंयोग-रूप पाक से उत्पन्न होते हैं तथा नष्ट भी होते हैं, अतः पृथिवीद्रव्य में आधारद्रव्य के नाश से ही रूपादि गुणों के नष्ट होने का नियम नहीं है ॥ ६ ॥

उपस्कार—सूत्र में पाकज शब्द से अग्निसंयोग से बदलनेवाले रूप, रस, गन्ध तथा स्पर्श चार विशेष गुण ऐसा अर्थ करना। कारणगुणपूर्वकाः इस सूत्र के पद का रूप के आश्रय घटादि पृथिवी को जो समवायिकारण कपालादि, उसके गुणानुसार घटादि पृथिवी में रूपादि गुण होते हैं यह अर्थ है, ऐसा होने से कपाल का रूप घटरूप के समवायिकारण घटरूप एक पदार्थ में दोनों के संनिकर्ष से घट के रूप का असमवायिकारण होता है। एवं (इसी प्रकार) रसादि गुणों में भी जानना। (रूपत्वादि धर्म जाति रूप हैं यह सिद्ध करते हुए शंकरमिश्र कहते हैं)—रूप, रस, गन्ध तथा स्पर्श यह चार गुण रूपत्व, रसत्व, गन्धत्व, तथा स्पर्शत्वरूप गुणत्व-जाति की साक्षात् व्याप्य जाति के आश्रय हैं। 'चक्षुरिन्द्रियग्राह्यता ही जातिभिन्न अखण्ड धर्मरूप उपाधि ही क्यों न मानी जाय' ऐसी पूर्वपक्षी शंका करे तो इसका

प्रत्ययानुदयप्रसङ्गात् । अननुसंहितोपाधेरुपहितप्रत्ययायोगादिति । उपाधिश्चात्र चक्षुस्तच्चातीन्द्रियं ग्राह्यत्वञ्च ग्रहणविषयत्वं तदप्यचाक्षुषं रूपत्वविशिष्टप्रतीतेश्च चाक्षुषत्वात् । चक्षुर्मात्रबहिरिन्द्रियग्राह्यगुणत्वं रूपत्वम् । अतीन्द्रियरूपाव्याप्तिरिति चेन्न चक्षुर्मात्रबहिरिन्द्रियग्राह्यजातिमत्त्वस्य विवक्षितत्वात् तादृशी च जाती रूपत्वं नीलत्वादिका चेति । नन्वेकैका एव नीलपीतादिव्यक्तयो नित्या न तु तत्र नीलत्वादिजातय एकव्यक्तिकत्वादिति चेन्न नीलतरनीलतमादिप्रत्ययानुदयप्रसङ्गात् । धावल्यादिसम्भेदाभावकृतस्तत्र तारतम्यव्यवहार इति चेन्न प्रमाणाभावात्, श्यामं रूपं नष्टं रक्तमुत्पन्नमिति

उत्तर यह है कि ऐसा मानने से रूप के साथ चक्षुरिन्द्रिय का संनिकर्ष होते ही जो इन्द्रिय से ग्राह्य होता है उसे रूप कहते हैं ऐसे ज्ञान के बिना भी जो यह रूप है ऐसा ज्ञान होता है वह न हो सकेगा, क्योंकि बिना उपाधिधर्म के ज्ञान के उपाधिवाले का ज्ञान नहीं होता। यहाँ उपाधि है चक्षुरिन्द्रिय, और वह अतीन्द्रिय (अप्रत्यक्ष) है, और ग्राह्यता शब्द का अर्थ है ग्रहण (ज्ञान) का विषय होना, वह भी चाक्षुषप्रत्यक्ष का विषय नहीं है, रूपत्वजातिविशिष्टरूप का ज्ञान तो चक्षुरिन्द्रिय से प्रत्यक्ष होता है। चक्षुरूप इन्द्रियमात्र से गृहीत होनेवाले गुणत्व को रूपत्व कहते हैं। (ऐसा होने से ज्ञान के अतीन्द्रिय चक्षुरिन्द्रिय घटित होने से तथा रूप ज्ञान के भी चाक्षुष न होने के कारण रूप में अतीन्द्रियता के आने की आपत्ति होने से रूप चाक्षुषप्रत्यक्ष का विषय न होगा। तथा रूपत्व जाति की अपेक्षया चक्षुग्राह्यतारूप उपाधि के गुरु शरीर होने से तथा जातिमात्र का इस प्रकार न मानने की आपत्ति आने से, एवं अतीन्द्रिय परमाणुओं के रूप में चक्षुर्ग्राह्यतारूप उपाधि धर्म के न रहने से भी रूपत्व उपाधि नहीं है, किन्तु जाति यह तात्पर्य यहाँ जानना।) यदि 'रूपत्व जाति मानी जाय तो अतीन्द्रिय परमाणुरूप में अतिव्याप्ति दोष आ जायगा' ऐसी पूर्वपक्षी शंका नहीं कर सकता, क्योंकि केवल चक्षुरिन्द्रिय से गृहीत होनेवाली जगने के आश्रय को हम रूप कहते हैं, ऐसी जाति होगी रूपत्व, नीलत्व आदि। (वह अतीन्द्रियरूप में रहने से उक्त अतिव्याप्ति दोष न होगा)। 'नीलत्व पीतत्व आदि रूपत्व की व्याप्य जातियां नहीं हो सकतीं, क्योंकि नील, पीत इत्यादि एक ही रूप व्यक्ति हैं, जो नित्य है, तो उनसे एक-एक नील आदि व्यक्तियों में रहने के कारण नीलत्वादि जाति क्यों मानी जाय ? ऐसी शंका पूर्वपक्षी नहीं कर सकता, ऐसा मानने से (एक-एक ही नीलादि व्यक्ति होने से) नीलतर (अधिक नील) नीलतम (अत्यन्त अधिक नील) इत्यादि ज्ञान न होगा। यदि 'श्वेतता गुण के मिश्रण के अभाव से उक्त तरतमभाव की उक्त प्रतीति होती है' ऐसा कहो तो, इसमें कोई प्रमाण नहीं है। तथा 'श्याम रूप नष्ट हुआ' 'रक्त रूप उत्पन्न हुआ' ऐसी नीला-

प्रतीतेश्च। न च सा समवायोत्पत्तिविनाशकृतेति वाच्यम् समवायस्य तत्रानुल्लेखात्, तस्य नित्यत्वाच्च, घटादेरप्यनित्यतायामेवंसत्यनाश्वासापत्तेः समवायानित्यत्वेनैव तत्राप्यन्यथासिद्धेः सुवचत्वात्।

ननु नीलपीतादयो गुणा द्रव्याभिन्ना एव धर्मधर्मिणोरभेदादिति चेन्न रूपं घटः स्पर्शो घट इत्यादिव्यवहारप्रसङ्गात्। ननु नेदमनिष्टं यतो भवत्येव शुक्लः पटो नीलः पट इत्यादिप्रतीतिरिति चेन्न मतुब्लोपादभेदोपचाराद्वा प्रतीत्युपपत्तेः। भेदे प्रमाणे सति कल्पनेयं यथाकथञ्चिदुपपद्यते इति चेन्न चन्दनस्य रूपं चन्दनस्य गन्ध इत्यादिव्यपदेशबलाद्भेदसिद्धेः, पटस्य रूपाभेदे पटवद्रूपमपि त्वगिन्द्रियेण गृह्येत,पटमानयेत्युक्ते यत्किञ्चिद्रूपमानयेत् रूपमानयेत्युक्ते

दिकों के उत्पत्ति तथा विनाश की प्रतीति एक तथा नित्य नीलादि व्यक्ति मानने के पक्ष में न होगी। यदि श्याम नष्ट हुआ रक्त उत्पन्न हुआ इसी प्रतीति का श्यामरूप का समवाय नष्ट हुआ तथा रक्तरूप का समवाय उत्पन्न हुआ यह अर्थ है, ऐसा कहो तो यह भी नहीं हो सकता, क्योंकि उस प्रतीति में समवाय का उल्लेख (नामग्रहण) नहीं है, और वह नित्य भी है, और इस नीलादिकों के समान घटादि पदार्थ भी अनित्य हैं इस विषय में विश्वास न होगा, क्योंकि घटादि पदार्थों में भी उनके समवाय की उत्पत्ति तथा विनाश मानकर घट उत्पन्न हुआ, नष्ट हुआ यह अनित्यता हो सकने से घटादि पदार्थ भी नीलादिकों के समान एक तथा नित्य हो जांयगे यह कहा जा सकता है। 'नील पीत आदि घटादि द्रव्यों से भिन्न नहीं हैं, क्योंकि धर्म तथा धर्मी का भेद नहीं होता' ऐसा पूर्वपक्षी आक्षेप करे तो यह नहीं हो सकता, ऐसा धर्म-धर्मी का अभेद माना जाय, तो रूप घट है, स्पर्श घट है, इत्यादि व्यवहार होने लगेगा। यदि पूर्वपक्षी कहे कि यह तो इष्ट (अभिमत) ही है, क्योंकि शुक्ल पट है, नील पट है, इत्यादि धर्म तथा धर्मी में एकता दिखानेवाला ज्ञान तो होता ही है, तो यह नहीं कह सकते, क्योंकि शुक्ल शब्द के उत्तर शुक्लवर्णवाला इस अर्थ के बोधक मतुप् प्रत्यय का लोप मानकर अभेद गौण धर्म तथा धर्मी का अभेद मान कर 'शुक्ल पट है'इत्यादि व्यवहार हो सकतां है। यदि "शुक्ल वर्ण तथा पट के भेदविषय में प्रमाण हो तो यह मतुप् लोप अथवा गौण अभेद की कल्पना किसी तरह हो सकेगी। अर्थात् जब रूप और आधार का भेद नहीं है तो उपचार (गौणता) कैसे मानी जाय ? ऐसी शंका नहीं हो सकती, क्योंकि चन्दन का रूप, चन्दन का गन्ध इत्यादि व्यवहार के बल से चन्दन तथा उसके रूप, और गन्ध का भेद सिद्ध होता है। तथा पट और उसके रूप को एक माना जाय तो पट के समान रूप का भी अन्धे को त्वगिन्द्रिय से प्रत्यक्ष होने लगेगा। एवं 'पट को ले आओ' ऐसा कहने पर जिस किसी रूप को ले आनेवाला ले आयेगा। एवं रूप को ले आओ ऐसी आज्ञा देने पर जिस किसी घटादि द्रव्य को

यत्किञ्चिद् द्रव्यमानयेत्। अस्तु तर्हि भेदाभेदः अत्यन्तभेदेऽत्यन्ताभेदे च सामानाधिकरण्यानुपपत्तेरिति चेन्न अवच्छेदभेदं विना विरुद्धयोर्भेदाभेदयोरेकत्रासम्भवात्। अन्योन्याभावत्वमव्याप्यवृत्तिवृत्तिनित्याभाववृत्तिधर्मत्वादत्यन्ताभावत्ववदिति चेन्न एकत्र संयोगतदत्यन्ताभावयोः प्रतीतिबलादत्यन्ताभावस्याऽव्याप्यवृत्तित्वाभ्युपगमात्, अन्योन्याभावे तु तथाप्रतीतेरभावात्।

तदेतद्रूपं पृथिव्यां नानाप्रकारकम्, पार्थसि तेजसि च शुक्लमेव। क्वचित् पटादौ च चित्रमपि रूपमधिकम् अन्यथा तदचाक्षुषत्वापातात् रूपवत एव चाक्षुषद्रव्यत्वात्। न च विजातीयरूपै रूपानारम्भः, नीलपीतादीनामारम्भे रूपत्वेनैव साजात्यस्यापेक्षितत्वात् अन्यथा तदचाक्षुषत्वापत्तेरुक्तत्वात्। न चावयवरूपोपग्रहेणैवावयविग्रहः अवयवानामपि चित्रतया नीरूपत्वप्रसङ्गात्,

---

आज्ञा पानेवाला ले आवेगा। यदि 'शुक्ल पट है इस प्रतीति में शुक्लवर्ण तथा पटत्व के एक अधिकरण में प्रतीति के अन्यथा न बन सकने से शुक्लरूप तथा पट का भेद तथा अभेद होनों मानेंगे, क्योंकि शुक्लवर्ण तथा पट का अत्यन्त भेद तथा, अत्यन्त ऐक्य मानने के पक्ष में प्रदर्शित सामानाधिकरण्य प्रतीति नहीं हो सकती' ऐसी शंका पूर्वपक्षी करे तो यह भी ठीक नहीं, क्योंकि अवच्छेद (विशेषण) के भेद के विना विरुद्ध भेद तथा अभेद एक पदार्थ में नहीं रह सकते (अर्थात् व्याप्यवृत्ति अन्योन्याभाव (भेद) का अवच्छेद (विशेषण) भेद होना असंगत है) यदि अन्योन्याभावत्व (भेदत्व,) अव्याप्यवृत्ति (भेद) में रहता है, नित्य अभाव में वर्तमान धर्म होने से अत्यन्ताभावत्व के समान, इस अनुमान से भेद को भी अव्याप्यवृत्ति मान लेंगे' ऐसी पूर्वपक्षी शंका करे तो यह भी नहीं हो सकता, एक वृक्षादिकों में अग्रभाग में कपि के संयोग तथा मूलभाग में उसके अभाव इन दोनों की प्रतीति होने के कारण अत्यन्ताभाव को अव्याप्यवृत्ति (एकदेशवृत्ति) माना जाता है, किन्तु 'वृक्ष कपिसंयोगी नहीं है' ऐसी प्रतीति न होने के कारण भेद को अव्याप्यवृत्ति नहीं माना जा सकता।

वह यह रूप नामक गुण पृथिवी द्रव्य में शुक्ल, नील, पीत, रक्त, हरित, कपिष, तथा छित्र भेद से अनेक (सात) प्रकार का, और जल तथा तेजद्रव्य में शुक्लरूप ही है। किसी-किसी पट आदि में चित्र नाम का भी छः रूपों से अधिक रूप है, न हो तो उस चित्र (अनेक रङ्गवाले) पट का चाक्षुषप्रत्यक्ष न होगा, क्योंकि रूपाश्रय ही द्रव्य का चाक्षुषप्रत्यक्ष होता है। 'अवयवों के विरुद्धजातिवाले अनेक रूपों से अवयविद्रव्य में एकरूप की उत्पत्ति नहीं हो सकती।' ऐसी पूर्वपक्षी शंका नहीं कर सकता, क्योंकि नील, पीत इत्यादि रूपों के उत्पत्ति में रूपत्वधर्म से ही समान जातीयता आवश्यक है, नहीं तो उस चित्ररूपवाले पट का प्रत्यक्ष न होगा यह दोष कहा है। अर्थात् रूपत्वरूप से कारणता होने के कारण यदि

यत्र वा पाकात् परमाणुषु चित्रं रूपं तत्रैव तत्परम्परारब्धपटादौ चित्ररूपोपपत्तेः। न च हरीतक्यां रसोऽपि चित्र इति वाच्यम् हरीतक्या नीरसत्वेऽपि दोषाभावात्, षड्रसत्वव्यवहारस्तु तत्तद्रसगुणकारितया। एवं गन्धोऽपि न चित्रः सौरभासौरभवदवयवद्वयस्यानारम्भकत्वात्। कर्कट्यादौ क्वचिदवयवे तैक्ष्ण्यं क्वचिन्माधुर्यं तथाच कतमो रसः कर्कट्यामिति चेन्माधुर्यमेव। गुणविरोधेन कथं तथा स्यादिति चेत् तदवयवे तैक्ष्ण्याभावात्। तथाऽनुभवः कथमिति चेत् कर्कटीभक्षणक्षुभितरसनाग्रवर्त्तिपित्तद्रव्यस्य तिक्ततोपलम्भात्, तत एव कदाचिन्मुखमपि तिक्तायते। हरीतक्यामपि कथमियं न गतिरिति चेन्न तदवयवेषु कषायमाधुर्यलवणादिनानारसानुभवादित्यलं पल्लवेन।

विरुद्ध जातिवाले अवयवों के अनेक रूपों से चित्ररूप न मानने पर भी अवयवों के चित्ररूप से उसकी उत्पत्ति होने से कोई बाधक न होने के कारण अवयवी का प्रत्यक्ष न होगा। किन्तु नवीन नैयायिकों ने चित्ररूप नहीं माना है क्योंकि अवयवों के विशेषों में वर्तमान रूपों के भेद से ही अवयवी का ग्रहण हो सकता है नहीं तो चित्ररूप के समान चित्ररस भी मानना पड़ेगा यह उनका आशय है) ॥

'अवयवों के रूपों के ग्रहण से ही अवयवी का ग्रहण हो जायगा', यह नहीं कहा जा सकता, क्योंकि अवयव भी चित्र होने से विरोध के कारण रूपरहित हो जांयगे, अथवा जहाँ पाक से परमाणुओं में ही चित्ररूप होता है वहीं पर उन परमाणुओं के द्व्यणुकादि क्रमपरम्परा से उत्पन्न पटादि अवयवि द्रव्य में चित्ररूप हो सकता है। यदि ऐसा है तो हरीतकी (हर्रे) में रस भी चित्र होगा' ऐसा नही कहा जा सकता, क्योंकि हरीतकी (हर्रे) में रस न होने पर भी दोष नहीं होगा, षड्रस पृथिवी द्रव्य होता है यह प्रवाद (मत) तो उन २ मधुरादि रसरूप गुणों को करने के कारण है। इसी प्रकार गन्धगुण को भी चित्र मानने की आवश्यकता नहीं है, सुरभि तथा असुरभि गन्धवाले विरुद्ध अवयवों से कार्यगन्ध उत्पन्न नहीं हो सकता। 'कर्कटी (खीरा) आदिकों में कुछ अवयवों का तिक्त तीता रस का तथा कुछ अवयवों में मधुर रस का अनुभव होता है, तो उस कर्कटी में कौन रस माना जाय', तो मधुररस मानना ही उचित है। 'तिक्त तथा मधुर रस का परस्पर विरोध होने के कारण यह कैसे होगा' ऐसा कहो तो, उसके अवयवों में तिक्त (तीतापन) न होने से। तो उस 'कर्कटी में तिक्त रस का अनुभव कैसे होता है' ? ऐसा कहो तो उस कर्कटी के खाने से क्षुभित हुए जिह्वा के अग्रभाग में वर्तमान पित्त-रूप द्रव्य की तिक्तता की उपलब्धि (ग्रहण) होने के कारण, उसी से कदाचित् मुख का भी तिक्त (तीते) के समान अनुभव होता है। तो 'हरीतकी (हर्रे) में भी यही प्रकार क्यों न माना जाय !' ऐसी शंका यदि पूर्वपक्षी करे तो यह नहीं हो सकता, क्योंकि हरीतकी के अवयवों में कषाय, मधुरता, लवण (खारापन)

तच्च रूपं नयनसहकारि। नन्वेवं वायौ रूपाभावस्य तमसश्च कथं चाक्षुषतेति चेन्न भावग्रह एव रूपस्य नयनसहकारित्वात्, विषयालोकचक्षुषां त्रयाणामपि रूपाणि चाक्षुषप्रतीतिप्रयोजकानि।

रसोऽपि रसत्वजातिमान्। रसत्वं रसनेन्द्रियमात्रजन्यसाक्षात्कारविषयजातिः तादृशजातिमत्त्वञ्च रसत्वम्। सोऽयं जीवनपुष्टिबलारोग्यहेतुः रसनसहकारी। रसनेन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्त्वं रसत्वम्, तथासति नातीन्द्रियरसाव्याप्तिः।

घ्राणमात्रग्राह्यो गुणो गन्धः। घ्राणमात्रग्राह्यगुणत्वव्याप्यजातिमत्त्वं गन्ध-

---

इत्यादि नाना प्रकार के रसों का अनुभव होता है। इस विषय में अधिक विस्तार की आवश्यकता नहीं है।

वह उक्त स्वरूप रूप नामक विशेषगुण चाक्षुषप्रत्यक्ष की उत्पत्ति में सहकारिकारण है। ऐसा मानने से 'वायुद्रव्य में रूप के अभाव, तथा अन्धकार का चाक्षुषप्रत्यक्ष कैसे होगा ?' ऐसा पूर्वपक्षी आक्षेप नही कर सकता, क्योंकि भावरूप पदार्थों के चाक्षुषप्रत्यक्ष में ही रूपगुण चाक्षुषप्रत्यक्ष सहायक होता है। विषय, आलोक (प्रकाश) तथा चक्षु इन तीनों के रूप चाक्षुषज्ञान होने में प्रयोजक हैं (अन्यथा रक्तप्रकाश में वर्तमान शंख का रक्तरूप से, तथा पित्तदोष से दूषित चक्षुरिन्द्रिय के संनिकृष्ट पदार्थ का पीतरूप से ग्रहण न होगा। किन्तु विषय में वर्तमान रूप ही कारण है, आलोकादिकों के भी विषय होने से रक्तप्रकाश में स्थित शंख का रक्तरूप से ज्ञान होना भी संगत हो जायगा' ऐसा नवीन नैयायिकों का मत है)।

रसत्वजातिविशिष्ट गुण का नाम रस है। रसनेन्द्रिय (जिह्वा) मात्र से उत्पन्न प्रत्यक्ष का विषय जाति है रसत्व, उस जाति का आधार होना ही रसगुण में रसत्व है, वह यह रसगुण जीवन, शरीरपुष्टि, बल तथा आरोग्य (निरोगता) का कारण है (इससे मरण, कृश होना, दुर्बलता भी सूचित होती है, क्योंकि ये भी रस से उत्पन्न होते हैं। गन्ध, स्पर्श आदि गुण रसग्रहण से ही जीवनादिकों में उपयोगी होते हैं अतः उनमें ये सब नहीं कहे हैं)। तथा रस रसनेन्द्रियजन्य प्रत्यक्ष ये सहायक कारण हैं। रसनेन्द्रिय से गृहीत होनेवाली गुणत्वव्याप्यरसत्वजाति का आधार होना ही रसगुण में रसत्व है, ऐसा लक्षण करने से अतिन्द्रिय परमाणु रस में अव्याप्ति दोष न होगा।

केवल घ्राणेन्द्रिय से प्रत्यक्ष होनेवाले गुण का नाम है गन्ध। केवल घ्राणेन्द्रिय से ग्रहण होने योग्य गुणत्व की व्याप्य गन्धत्व जाति का आश्रय होना गन्ध में गन्धत्व है, ऐसे जातिघटित लक्षण से अतीन्द्रिय गन्ध में अव्याप्ति दोष न होगा।

त्वम्, स च सुरभिरसुरभिश्चेति द्विविधः। यद्वा पृथिवीवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं गन्धत्वम्।

एवं स्पर्शोऽपि स्पर्शत्वजातिमान् गुणः। त्वगिन्द्रियमात्रग्राह्यगुणत्वसाक्षाद्व्याप्य जातिमत्त्वं स्पर्शत्वम्। द्रव्यचतुष्टयवृत्तिश्चायम्। अनुष्णाशीतशीतोष्णभेदात् त्रिविधः।

इदानीं प्रसङ्गात् पाकजप्रक्रिया चिन्त्यते—तत्र कार्यकारणसमुदाय एव पच्यते इति पिठरपाकवादिनः।

पीलवः—परमाणव एव स्वतन्त्राः पच्यन्ते, तत्रैव पूर्वरूपनाशाग्निमरूपाद्युत्पत्तिः कारणगुणप्रक्रमेण चावयविनि रूपादुयुत्पद्यते इति पीलुपाकवादिनः।

अत्रेदं तत्त्वम्। आपाके निःक्षिप्तस्य घटादेरामद्रव्यस्य वह्निना नोदनादभिघाताद्वा तदारम्भकेषु परमाणुषु द्रव्यारम्भकसंयोगविरोधिविभागेनारम्भकसंयोगनाशे द्रव्यनाशावश्यम्भावात्। दृश्यते हि स्थाल्यामाहितानां तण्डुलादीनामप्यधःसन्तापनमात्रेण भर्जनात्तदानीमेव नाशः, क्षीरनीरादीनाञ्चात्यन्तमुल्ब-

---

वह गन्धगुण सुगन्ध और दुर्गन्ध इस भेद से दो प्रकार का है अथवा केवल पृथिवीद्रव्य में वर्तमान गुणत्व की साक्षात् व्याप्यजाति का आधार होना ही गन्ध में गन्धत्व है।

इसी प्रकार स्पर्शत्व जाति के आश्रय गुण का नाम है स्पर्शगुण। केवल त्वचा इन्द्रिय से गृहीत होनेवाली गुणत्व की साक्षात् व्याप्यजाति का अधिकरण होना ही स्पर्शगुण में स्पर्शत्व है। यह स्पर्शगुण पृथिवी, जल, तेज तथा वायु ऐसे चार द्रव्यों में रहता है, जो अनुष्णाशीत, शीत तथा उष्णभेद से तीन प्रकार का है।

साम्प्रत प्रसङ्ग से पाकज प्रक्रिया का विचार करते हैं—उसमें कार्य तथा कारणों का समुदाय ही पाकज (तेज के संयोग से बदलता) है ऐसा पिठर (अवयविद्रव्य) में पाक माननेवाले नैयायिकों का मत है। और केवल पीलू (परमाणु) ही स्वतंत्र होकर पकते हैं, उन्हीं में पूर्वश्यामरूपादिकों का नाश होकर आगे रक्तरूप आदि गुणों की उत्पत्ति होती है, और कारणगुणों के क्रम से अवयविद्रव्य घट फल आदिकों में रूप, रसादिगुणों की उत्पत्ति होती है, ऐसा पीलुपाकवादि वैशेषिकों का मत है। यहां पर यह तत्त्व (सिद्धान्त) है कि आपाक (आंवे) में रखे हुए घट, फल आदि आम (कच्चे) द्रव्य का अग्नि, तृण आदि की उष्णता के नोदन अथवा अभिघात नामक संयोग से घटादि अवयवि द्रव्यों के उत्पादक परमाणुओं में घटादिद्रव्य के उत्पादक संयोग के विरोधी विभाग से घटादियों के आरम्भक परमाणुओं का पूर्व संयोग के नष्ट होने पर घटादि द्रव्य का नाश अवश्य होगा। क्योंकि (स्थाली) बटुली में रखे हुए तण्डुल (चावल, दाल) इत्यादिकों का बटुली के नीचे केवल अग्नि के सन्ताप से भूंज जाने से तत्काल नाश हो जाता है, और दूध तथा जल कढ़ने

णता। तथा चापाके वह्निज्वालाजालाभिहतानां द्रव्याणामवस्थानमिति महती प्रत्याशा। किञ्च यदि द्रव्यनाशस्तदा मध्यभागे पाकानुपपत्तिः, न हि दृढतरावयवान्तरावरुद्धे मध्यभागे तेजःसंयोगासम्भावना येन तत्र श्यामादिनिवृत्तिः स्यात्, तथा च श्यामा अवयवाः अवयवी च रक्त इति महद्वैशसम्। ननु सच्छिद्राण्येवावयविद्रव्याणि, कथमन्यथा कुम्भादावन्तर्निहितानां तैलघृतादीनां स्यन्दनं श्रपणञ्च, तथा च मध्यभागेऽपि तेजःसंयोगः स्यादेवेति चेन्न मूर्त्तानां

लगता है, यह भी देखने में आता है, तब आपाक (आंवे) में रखे हुए अग्नि की ज्वाला से अभिहत (अभिघात संयोगवाले) घटादि द्रव्य पूर्ववत् रहते हैं यह केवल वही आशामात्र है (यदि जहां नाश का प्रत्यक्ष होता है वहां ऐसा मानेंगे, किन्तु परमाणुओं का नाश तो अप्रत्यक्ष है, तस्मात् इसमें क्या प्रमाण, ऐसी पूर्वपक्षी शंका करे तो शंकरमिश्र दूसरा दोष देते हुए कहते हैं कि)—और यदि आंवे में रखे घड़े का नाश होता हो तो, घट के मध्यभाग में पाक नहीं सकेगा, क्योंकि अत्यन्त दृढ़ दूसरे अवयवों से घिरे हुए मध्यभाग में अग्निरूप तेज के संयोग की संभावना नहीं हो सकती, जिससे मध्यभाग में (घट के भीतर) श्यामादिपूर्वरूप की निवृत्ति हो, ऐसा होने से घटके अवयव श्याम तथा घटरूप अवयवी रक्त ऐसा प्राप्त होने से बड़ा भारी वैशस (वैषम्य) होगा। यदि 'घटादि अवयविद्रव्य सच्छिद्र होते हैं, अन्यथा घट के भीतर रखे हुए तेल, घृत आदि द्रव्यों का बाहर स्यन्दन (चूना) श्रवण (पकना) यह भी न हो सकेगा, ऐसा होने के कारण घट के मध्यभाग में तेज (अग्नि) का संयोग अवश्य होता है, जिससे उक्त वैषम्यदोष न आवेगा' ऐसी पूर्वपक्षी (पिठरपाकवादी) शंका करे तो, यह असंगत है, क्योंकि मूर्त अनेक द्रव्यों का समान (एक) देश में रहने का विरोध होता है, अतः दूसरे अवयवों से संयुक्त मध्यभाग में तेज का संयोग नहीं हो सकता।

इस पिठरवादी के मत का जो खण्डन शंकरमिश्र ने पीलुपाकवादियों के मत से किया है उससे यह विचार हो सकता है कि यदि मूर्त द्रव्यों के संयोग से समानदेशता का विरोध माना जाय तो वह समानसंयोगविशेष को लेकर ही माना जायगा नहीं तो प्रचय (शिथिलता प्रयोजक) संयोग युक्त तूलक (रूई) के भीतर प्रकाश का जाना, तथा सूक्ष्म रेशम के वस्त्र से जल का निकलना, तथा स्पंदन (हिलना) आदि क्रिया भी जो प्रत्यक्ष से गृहीत होती है नहीं बन सकेगी, अतः अवयवसंयोग, तथा तेज का संयोग आदि समान नहीं हो सकते, उनके समान न होनेसे उस संयोग के साथ समानदेशता का विरोध नहीं हो सकता, अतः पिठरपाकवाद भी युक्त ही है। (इस विषय में कणाद (रहस्यग्रन्थ में और विस्तार देख लेना चाहिये)। (आगे पीलुवाद पर पूर्वपक्षिमत से शंकरमिश्र शंका दिखाते हुए कहते हैं कि)—यदि उक्त प्रकार से आंवे में डाले हुए घटादि द्रव्य का नाश होता हो तो, बाहर निकालने पर

समानदेशताविरोधात्, अवयवान्तरसंयुक्ते मध्यभागे तेजःसंयोगासम्भवात्। ननु यदि द्रव्यनाशः कथं तर्हि स एवायं घट इति प्रत्यभिज्ञा, कथं वा सर्वास्ववस्थासु आपाकादौ घटादेस्तादृशस्यैव दर्शनम्, घटादेरुपरि निहितानां शरावोदञ्चनादीनां तथैव दर्शनं घटादिस्फुटने हि तेषां पातः स्यात्, कथं वा यावन्त एवापाके निहितास्तावन्त एव पुनः प्राप्यन्ते परमाणुभिर्द्व्यणुकादिप्रक्रमेण न्यूनानामधिकानां वा तदानीमारम्भसम्भवात्, कथं वा तावत्परिमाणान्येव घटादीन्यापाकोत्तीर्णान्युपलभ्यन्ते, रेखोपरेखादिचिह्नविलोपो वा कथं न भवेत्, ? तथा चावयविष्वेव पाक इति चेत् मैवम्, सूच्यग्रेण घटादौ त्रिचतुरत्रसरेणुविभागे सति द्रव्यारम्भकसंयोगनाशे द्रव्यनाशे सर्वासामनुपपत्तीनामुभयसमाधेयत्वात् न हि तत्र द्रव्यं न नश्यतीति पिठरपाकवादिनोऽपि वक्तुमुत्सहन्ते।

तत्रापि घटादयो न नश्यन्ति कतिपयावयवनाशेऽप्यत्र शिष्टावयवमाश्रित्य कार्यावस्थानसम्भवादन्यथा प्रत्यभिज्ञानाद्यनुपपत्तिरेवेति मीमांसकाः।

'वही यह घट है' ऐसी प्रत्यभिज्ञा (पहिचान) कैसे होगी, अथवा संपूर्ण अवस्थाओं में आंवे में वैसा ही घट कैसे दिखाई पड़ेगा, एवं घटादिकों पर रखे हुए किसोरे पुरवे आदि वैसे ही क्यों दिखाई पड़ेंगे बल्कि घट के नष्ट होने से वे गिर जांयगे, अथवा जितने ही आंवे में रखे गये थे उतने ही पुनः क्यों प्राप्त होते हैं। क्योंकि स्वतन्त्र परमाणुओं से द्व्यणुकादि क्रम से कम (न्यून) अथवा अधिक उस समय उत्पन्न हो सकते हैं। अथवा कैसे आंवे से निकालने पर भी उतने ही परिमाणवाले ही क्यों पाये जाते हैं ? अथवा रेखा (लकीर) उपरेखा (पास की लकीर) आदि चिह्नों (निशानों) का लोप कैसे न होगा (अर्थात् घट पर किये हुए निशान क्यों न मिट जांयगे), ऐसा होने से यह सिद्ध होता है कि अवयवि घट में ही पाक होता है इस शंका का उत्तर पीलुपाकवादी ऐसा करते हैं कि ऐसा नहीं, क्योंकि सूची (सूई) के अग्रभाग से घटादि द्रव्यों में छेद होने के समय तीन या चार त्रसरेणुओं का विभाग होने पर उसके घट के उत्पादक पूर्वसंयोग का नाश होने के कारण घटरूप अवयविद्रव्य का नाश होने के कारण संपूर्ण पिठरवादी ने दिये दोषों का पिठर तथा पीलुपाकवाद ऐसे दोनों मत से समाधान होने की योग्यता समान ही है (अर्थात् दोनों का उक्त आपत्तियों का समाधान करना प्राप्त है) क्योंकि उस अवस्था में घटद्रव्य का नाश नहीं होता ऐसा पिठरपाकवादी नैयायिक भी नहीं कह सकते।

उस अवस्था में भी घटादि अवयवि द्रव्य नष्ट नहीं होते, क्योंकि कुछ अवयवों का नाश होने पर भी अवशिष्ट (न नष्ट हुये) अवयवों के आश्रय से घटरूप अवयवि द्रव्य की स्थिति हो सकती है, नहीं तो 'वही यह घट है' यह प्रत्यभिज्ञा न

ते तु तावदवयवावस्थानयोग्यस्य घटादेः स्वल्पेष्ववयवेषु कथं वृत्तिः स्यादिति प्रष्टव्याः। अविनष्ट एव पटे परिमाणसङ्कोचवदेतदुपपत्स्यते इति तेषामुत्तरमिति चेन्न कठिनतरावयवानां काष्ठपाषाणस्तम्भकुम्भादीनां सङ्कोचविकाशयोरदर्शनात्। घटादिनाशकाभिमतेन तत्परिमाणमेव नश्यतीति चेन्न परिमाणस्याश्रयनाशैकनाश्यत्वात् घटादिप्रत्यभिज्ञानवत् सूचीदलनस्थले परिमाणस्यापि प्रत्यभिज्ञायमानत्वात्, त्वन्मते तन्नाशस्याप्यनुपपत्तेरिति दिक्।

येषां मते द्रव्यारम्भकसंयोगप्रतिद्वन्द्वी तदप्रतिद्वन्द्वी च विभाग एकयैवावयवप्रक्रियया जन्यते तेषां द्व्यणुकनाशमारभ्य नवमक्षणे द्व्यणुकान्तरे रक्ताद्युत्पत्तिरेकस्मिन्नेव परमाणौ क्रियाचिन्तनात्। तथा हि-वह्निना नोदनाद् द्व्यणुकारम्भके परमाणौ कर्म, ततो विभागस्ततो द्रव्यारम्भकसंयोगनाशस्ततो द्व्यणुकनाशः नष्टे द्व्यणुके केवले परमाणावग्निसंयोगाच्छ्यामादिनिवृत्तिः। श्यामादौ निवृत्ते अन्य-

---

हो सकेगी, ऐसा मीमांसकों का मत है। उन मीमांसकों से हम यह प्रश्न कर सकते हैं कि—उतने (जितने अवयवों से वह बना था) अवयवों में रहने की योग्यता रखनेवाले वे घटादि अवयवि द्रव्य अल्प (कम) अवयवों में कैसे रह सकते हैं। 'यदि नष्ट न हुये ही पट में परिमाण के संकोच के समान यह भी हो सकेगा' ऐसा मीमांसकों का उत्तर हो तो, यह भी नहीं हो सकता, क्योंकि अत्यन्त कठिन (कड़े) अवयव वाले लकड़ी, पत्थर, स्तम्भ (खम्बा) तथा घटादि द्रव्यों में संकोच तथा विकास देखने में नहीं आता। यदि 'घटादिकों के नाश करनेवाले के अभिप्राय से उनका परिमाण ही नष्ट होता है' ऐसा कहो तो, यह भी नहीं हो सकता क्योंकि परिमाण गुण केवल आश्रय के नाश से ही नष्ट होता है, वही घट है इस प्रत्यभिज्ञा के समान सूची (सूई) से छेद करने के स्थल में परिमाणकी प्रत्यभिज्ञा होती है। आपके मत में (मीमांसक के मत में) उसका नाश भी नहीं हो सकता ऐसा मीमांसक के मत के खण्डन का प्रकार है।

जिनके मत में घटादि द्रव्य के उत्पादक संयोग का विरोधी तथा अविरोधी दोनों प्रकार का अवयवों का परस्पर विभाग एक ही परमाणुओं की क्रिया से उत्पन्न होता है, उनके मत में द्व्यणुक द्रव्य के नाश के क्षण से लेकर नवमक्षण में दूसरे उत्पन्न हुए द्व्यणुक में रक्त आदि गुणों की उत्पत्ति होती है, एक ही परमाणु में क्रिया मानने से। वह इस प्रकार है—वह्नि के नोदनसंयोग से पूर्व द्व्यणुक द्रव्य के उत्पन्न करनेवाले परमाणु में क्रिया होती है, उससे परस्पर परमाणुओं का विभाग होता है। जिससे पूर्व द्व्यणुक द्रव्य का उत्पादक परमाणुओं का पूर्वसंयोग नष्ट होकर पूर्वद्व्यणुक का नाश होता है। (१) द्व्यणुक का नाश होने पर केवल स्वतन्त्र परमाणु में अग्निसंयोग से पूर्वश्यामादि रूप निवृत्त हो जाता है (२) श्यामादि रूप

स्मादग्निसंयोगाद्रक्ताद्युत्पत्तिः । रक्तादावुत्पन्ने परमाणुक्रियानिवृत्तिस्तदनन्तरमदृष्टवदात्मसंयोगात् परमाणौ कर्म ततो विभागः ततः पूर्वसंयोगनिवृत्तिः ततः परमाण्वन्तरेण द्रव्यारम्भकः संयोगः ततो द्व्यणुकोत्पत्तिः उत्पन्ने द्व्यणुके कारणगुणप्रक्रमेण रक्ताद्युत्पत्तिः इति नव क्षणाः । यदि पूर्वक्रियानिवृत्तिक्षण एव क्रियान्तरमुत्पद्यते तदा, यदि तु पूर्वक्रियानिवृत्त्यनन्तरकाले क्रियान्तरमुत्पद्यते तदा दश क्षणाः ।

विभागजविभागाद्युपगमेऽपि यदि द्रव्यारम्भकसंयोगनाशविशिष्टं कालमपेक्ष्य विभागजो विभागस्तदा दशक्षणाः यदि तु द्रव्यनाशविशिष्टं कालमपेक्ष्य विभागेन विभागान्तरं जन्यते तदैकादशक्षणा प्रक्रिया ! तथा हि—द्व्यणुकनाशविभागजविभागावित्येकः कालःततः पूर्वसंयोगनाशश्यामादिनिवृत्तो उत्तरसंयोगरक्ताद्युत्पत्ती उत्तरसंयोगेन विभागजविभागक्रियानिवृत्ती ततो द्रव्यारम्भानुगुणा

निवृत्त होने पर दूसरे अग्निसंयोग से रक्तादि रूप उत्पन्न होता है । (३) रक्तादि रूप उत्पन्न होने पर पूर्वपरमाणु की क्रिया निवृत्त होने के पश्चात् उस बननेवाले घट के आगे भोगकर्ता आत्माओं के अदृष्टवाले आत्माओं के संयोग से पुनः दूसरे परमाणु में उत्पादकक्रिया होती है (४) उससे देशविभाग (५) उससे पूर्वदेशसंयोग की निवृत्ति (६) पश्चात् इस (परमाणु से दूसरे द्वचणुक द्रव्य का उत्पादक संयोग (७) पश्चात् दूसरे द्वचणुक द्रव्य की उत्पत्ति (८) द्वचणुक के उत्पन्न होने पर उसमें परमाणु रूप कारण के रक्तरूप के क्रम से रक्त रूपादिकों की उत्पत्ति होती है । ऐसे नव क्षण होते हैं, किन्तु यह नव क्षण की प्रक्रिया यदि पूर्वनाशक क्रिया के निवृत्ति के क्षण ही में दूसरी उत्पादकक्रिया उत्पन्न होती है ऐसा मानने के मत से है, और यदि पूर्वनाशक क्रिया के निवृत्त होने के पश्चात् दूसरे क्षण में दूसरी उत्पादकक्रिया उत्पन्न होती है, ऐसा माना जाय तो दश क्षण होते हैं ।

यदि विभाग से विभाग उत्पन्न होता है, ऐसा मानें तो कालविशेष की अपेक्षा से दश तथा एकादश क्षण की प्रक्रिया होती है, इस अभिप्राय से शंकरमिश्र कहते हैं कि)—विभागजन्य विभाग आदि मानने में भी यदि द्रव्यारम्भक पूर्वसंयोगनाशवाले समय की अपेक्षा कर विभाग से विभाग उत्पन्न हो तो, दश क्षण होते हैं और यदि द्वचणुकरूप द्रव्य के नाशवाले काल की अपेक्षा कर एक विभाग से दूसरा विभाग उत्पन्न होता है तो एकादश क्षण होते हैं, ऐसी प्रक्रिया (प्रकार) है । वह इस प्रकार है कि पूर्वद्वचणुक का नाश, तथा विभागजन्य विभाग यह एक काल है (१), पश्चात् पूर्वसंयोग का नाश, तथा पूर्वश्यामादि रूप की निवृत्ति (२) बाद उत्तरप्रदेशसंयोग तथा रक्तरूपादिकों की उत्पत्ति (३), पश्चात् उत्तरसंयोग से विभागजन्य विभाग एवं क्रिया की निवृत्ति (४), पश्चात् दूसरे द्वचणुक द्रव्य

परमाणुक्रिया, क्रियातो विभागो विभागात् पूर्वसंयोगनिवृत्तिस्ततो द्रव्यारम्भकः संयोगस्ततो द्रव्योत्पत्तिः उत्पन्ने द्रव्ये रक्ताद्युत्पत्तिः इति दशक्षणाः।

यदा तु द्रव्यविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागो जन्यते तदैकक्षणवृद्ध्या एकादश क्षणाः। तथा हि—द्रव्यविनाशः ततो विभागजविभागश्यामादिनिवृत्ती ततः पूर्वसंयोगनाशः तत उत्तरसंयोगरक्ताद्युत्पत्तो ततो विभागजविभागकर्मणोर्निवृत्तिः ततः परमाणौ द्रव्यारम्भानुगुणा क्रिया ततो विभागः पूर्वसंयोगनिवृत्तिः द्रव्यारम्भकसंयोगोत्पत्तिः द्व्यणुकोत्पत्तिः रक्ताद्युत्पत्तिश्चेत्येकादश क्षणाः। एकस्मिन्नेव परमाणौ क्रियाक्रियोपरमचिन्तनादेवम्। परमाण्वन्तरे

की उत्पादक के अनुकूल परमाणुओं में क्रिया (५), क्रिया से विभाग (६), विभाग से पूर्वसंयोग का नाश (७), पश्चात् दूसरे द्वयणुव द्रव्य का उत्पादक परमाणुओं का परस्पर संयोग (८), पश्चात् उससे दूसरे द्वयणुकरूप द्रव्य की उत्पत्ति (९), पश्चात् उत्पन्न हुए द्वयणुकद्रव्य में रक्तरूपादियों की उत्पत्ति (१०) ऐसी दश क्षण की प्रक्रिया है।

किन्तु जब पूर्वद्वयणुकद्रव्य के नाशवाले काल की अपेक्षा कर परमाणुओं के परस्पर विभाग से देश के साथ विभाग होता है तब एक क्षण की वृद्धि होने के कारण एकादश क्षण होते हैं। वह इस प्रकार है—कि पूर्वद्वयणुक का विनाश (१), उसके पश्चात् पूर्वप्रदर्शित विभागजन्य विभाग, तथा श्यामादि पूर्वरूप की निवृत्ति (२), पश्चात् द्वयणुक का आरम्भक परमाणु द्वय के संयोग का नाश (३), पश्चात् उत्तरदेशसंयोग, तथा रक्त रूपादिकों की उत्पत्ति (४), पश्चात् विभागजन्य विभाग तथा पूर्वक्रिया की निवृत्ति (५), पश्चात्, परमाणुओं में दूसरे द्वयणुकरूपद्रव्य की उत्पत्ति के अनुकूल उत्पादक क्रिया (६), पश्चात् उससे देश से विभाग (७), पूर्वदेशसंयोगनाश (८), तथा उसके पश्चात् दूसरे द्वयणुकरूप द्रव्य के उत्पादक परमाणुओं के संयोग की उत्पत्ति (९), पश्चात् दूसरे द्वयणुकरूप द्रव्य की उत्पत्ति (१०), पश्चात् रक्तादि रूप की उत्पत्ति (११)। इस प्रकार एकादश क्षण होते हैं। एक ही परमाणु में पूर्वद्वयणुकनाशक क्रिया का नाश तथा दूसरे द्वयणुकद्रव्य की उत्पादक क्रिया मानने के पक्ष में यह प्रदर्शित एकादश क्षण प्रक्रिया होती है। यदि दूसरे परमाणु में दूसरे द्वयणुक की उत्पादकक्रिया मानी जाय तो पूर्वद्वयणुक के नाश को लेकर पाँचवें, षष्ठ, सप्तम अथवा अष्टम क्षण में रक्तादि रूप की उत्पत्ति होती है यह जान लेना चाहिये इसका विवरण कणादरहस्य ग्रन्थ में है जो इस प्रकार है—उसमें एक परमाणु में नाशकक्रिया, उससे विभाग, पश्चात् आरम्भकसंयोग के नाशक्षण में दूसरे परमाणु में क्रिया आरम्भकसंयोगनाश से द्वयणुकनाश-दूसरे परमाणु की क्रिया से विभाग यह एक क्षण है। पश्चात् केवल परमाणु में श्यामरूप नाश विभाग से पूर्वसंयोगनाश यह द्वितीय क्षण है। पश्चात् रक्तरूप की उत्पत्ति,

यदि द्रव्यारम्भानुगुणा क्रिया चिन्त्यते तदा द्व्यणुकविनाशमारभ्य पञ्चमे षष्ठे सप्तमेऽष्टमे वा रक्ताद्युत्पत्तिरूहनीया । विवृत्तञ्चैतत् कणादरहस्ये ॥ ६ ॥

पार्थिवपरमाणुरूपादीनां तेजःसंयोगासमवायिकारणकत्वं साधयितुमाह—

एकद्रव्यत्वात् ॥ ७ ॥

पाकजानामिति शेषः । अत्र च गुणत्वे कार्यत्वे सतीति विवक्षितम् । तदयं प्रयोगः—पार्थिवपरमाणुरूपादयः संयोगासमवायिकारणकाः कार्यगुणत्वे सति

तथा दूसरे द्व्यणुक का उत्पादक परमाणुसंयोग यह तृतीय क्षण है । पश्चात् दूसरे द्व्यणुक की उत्पत्ति यह चतुर्थ क्षण है । पश्चात् रक्तरूप की उत्पत्ति यह पंचम क्षण है । द्रव्यनाश के क्षण में दूसरे परमाणु में किया से षष्ठ क्षण में रूपोत्पत्ति की प्रक्रिया ऐसी है कि परमाणु की क्रिया से दूसरे परमाणु से विभाग, पश्चात् पूर्वद्रव्य के आरम्भकसंयोग का नाश, पश्चात् पूर्वद्व्यणुक का नाश और उसी समय दूसरे परमाणु में क्रिया (१), पश्चात् श्यामरूप निवृत्ति के क्षण ही में दूसरे परमाणु की क्रिया से विभाग (२), पश्चात् रक्तरूप के उत्पत्ति क्षण में ही दूसरे परमाणु में कर्म मानने से पूर्वसंयोग का नाश (३), पश्चात् दूसरे परमाणु से संयोग (४), पश्चात् दूसरे द्व्यणुक द्रव्य की उत्पत्ति (५), पश्चात् रक्तरूप की उत्पत्ति (६) । इस प्रकार षष्ठक्षण की प्रक्रिया है । इसी प्रकार श्यामरूपनाश के क्षण में दूसरे परमाणु में क्रिया मानने से सप्तक्षण की प्रक्रिया तथा रक्तरूप की उत्पत्ति के क्षण में दूसरे परमाणु में क्रिया मानने से अष्ठ (आठ) क्षण की प्रक्रिया, एवं रक्तरूप की उत्पत्ति के पश्चात् दूसरे परमाणु में क्रिया मानने से नवक्षण की प्रक्रिया होती है । इनकी प्रक्रिया भी प्रदर्शित प्रक्रिया के समान स्वयं जान लेनी चाहिये । द्व्यणुकनाश के पश्चात् दूसरा द्व्यणुक द्रव्य उत्पन्न होकर द्वितीयादि क्षण में गुण की उत्पत्ति की प्रक्रिया शंकरमिश्र कृत कणादरहस्य आदिग्रन्थ में स्पष्ट है जो वहीं पाठकों को स्वयं देख लेनी चाहिये (यह ग्रन्थ चौखम्बा संस्कृत सीरीज में मुद्रित हो चुका है) ॥ ६ ॥

पाकज परमाणु रूपादि गुणों में तेज का संयोग असमवायि कारण होता है, यह सिद्ध करने के लिये सूत्रकार कहते हैं—

पदपदार्थ—एक द्रव्यत्वात् = एक द्रव्य में आश्रित होने से (पाकज रूपादिगुण अग्निसंयोगासमवायि कारण के हैं) ॥ ७ ॥

भावार्थ—पार्थिव परमाणुओं के रूपादि गुण, अग्निसंयोगरूप असमवायिकारणवाले हैं, कार्यगुण होते हुए नित्य में वर्तमान दो में न रहनेवाले गुण होने से, शब्द तथा ज्ञानादिगुणों के समान इस अनुमान से पाकज रूपादिकों में तेज का संयोग असमवायिकारण होता है यह सिद्ध होता है ॥ ७ ॥

उपस्कार—सूत्र में अवांक्षित 'पाकजानां' इस पद का शेष पूरण करना और 'एकद्रव्यत्वात्' इस सूत्रोक्त हेतु की 'गुणत्वे कार्यत्वे सति' गुण तथा कार्य होते हुए ऐसी

नित्यनिष्ठाद्विष्ठगुणत्वात् शब्दवत्, बुद्ध्यादिवच्च। संयोगजत्वमात्रं वा साध्यं तेन विभागजशब्दे न व्यभिचार: वायुसंयोगस्य शब्दमात्रे निमित्तकारणत्वात्। पार्थिवरूपादीनाञ्च तेजोऽन्वयव्यतिरेकदर्शनात् तेज:संयोगासमवायिकारणकत्वं पक्षधर्मताबलात् सिध्यति ॥ ७ ॥

रूपरसगन्धस्पर्शानेकग्रन्थेन व्युत्पाद्य परिमाणस्य सर्वसिद्धत्वेन सङ्ख्यायाञ्च विप्रतिपत्तिबाहुल्यादुद्देशक्रममतिक्रम्य सूचीकटाहन्यायेन प्रथमं परिमाणपरीक्षामारभमाण आह –

अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते ॥ ८ ॥

नित्ये,–इति विषयेण विषयिणं नित्यत्वप्रतिपादकं चतुर्थाध्यायमुपलक्षयति। उपलब्ध्यनुपलब्धी इति यथायोगमन्वय: 'येन यस्याभिसम्बन्धो दूरस्थस्यापि

सूत्रकार की कहने की इच्छा है। इस कारण यह अनुमान का प्रयोग है—पार्थिव परमाणुओं के रूपादिगुण, संयोगरूप असमवायिकारण वाले हैं कार्यगुण होते हुए नित्य में वर्तमान दो में न रहनेवाले गुण होने से, शब्द के समान और ज्ञानादिगुणों के समान भी। केवल संयोगजन्यतामात्र इस उक्त अनुमान में साध्य है, जिससे विभागजन्य शब्द में व्यभिचार न होगा, क्योंकि वायु का संयोग संपूर्ण शब्दों में निमित्त कारण होता है। पार्थिव रूपादिगुणों में तेज का अन्वय तथा व्यतिरेक दिखाई पड़ने से तेज का संयोग असमवायिकारण है, यह पक्ष पार्थिव रूपादिकों में हेतु की वृत्तितारूप पक्षधर्मता के बल से सिद्ध होती है ॥ ७ ॥

इस प्रकार रूप, रस, गन्ध तथा स्पर्श नामक विशेष गुणों का एक ग्रन्थ (प्रकरण) से वर्णन कर परिमाण गुण के सर्वमत (लोकव्यवहारों) में होने के कारण, तथा संख्या नामक गुण में मतरूप अनेक (विप्रतिपत्ति) विवाद होने से उद्देशक्रम को उल्लंघन कर (क्रम प्राप्त संख्या को छोड़कर) सूची (सुई) के बाद कटाह (कढ़ाई) अर्थात् छोटे के बाद बड़े का वर्णन इस न्याय से परिमाण गुण की परीक्षा करने का सूत्रकार आरम्भ करते हैं—

पदपदार्थ—अणो: = अणुपरिमाण की, महत: च = और महत्परिमाण की भी उपलब्ध्यनुपलब्धि = ग्रहण तथा अग्रहण, नित्ये = नित्य होती हैं, व्याख्याते = यह व्याख्या है ॥ ८ ॥

भावार्थ—अणुपरिणाम का ग्रहण न होना, तथा महत्परिमाण का प्रत्यक्षग्रहण होना गुणों के नित्यताप्रतिपाद के चतुर्थाध्याय में व्याख्या किया गया है ॥ ८ ॥

उपस्कार—'नित्ये' इस सूत्र के पद से नित्यतारूप विषय से उसके विषयी नित्यता वर्णन करनेवाले चतुर्थाध्याय की सूचना होती है। 'उपलब्ध्यनुपलब्धि' इन दोनों का योग्यता के अनुसार अन्वय करना, क्योंकि येन = जिस पदार्थ के

तस्य सः' इति न्यायेन। तथा चाणोरनुपलब्धिरिति लभ्यते। तदेवं स्थूलो नीलः कलश इति प्रात्यक्षिकप्रत्यये यथा नीलं रूपं विषयस्तथा परिमाणमपि, तेन च परिमाणेन परमाणुपर्यन्तं परिमाणमुन्नीयते द्रव्यत्वाच्च। किञ्च द्रव्यप्रत्यक्षतायां रूपवत् परिमाणमपि कारणं, न हि महत्त्वमन्तरेण द्रव्यं प्रत्यक्षं भवति। तथा च द्रव्यप्रत्यक्षकारणत्वेन स्वयञ्च प्रत्यक्षतया परिमाणं गुणोऽस्तीति निश्चीयते। यदि हि घटादिस्वरूप परिमाणं स्यात् तदा महदानयेत्युक्ते घटमात्रमानयेत् तथा च प्रैषसंप्रतिपत्ती विरुध्येताम्। एवं घटपदात् परिमाणं प्रतीयेत परिमाणपदाद्वा घट इति।

मानव्यवहारासाधारणकारणत्वम्, द्रव्यसाक्षात्कारकारणविषयनिष्ठसामान्यगुणत्वं वा महत्त्वत्वम्। मानव्यवहारो हस्तवितस्त्यादिव्यवहारो न तु पलस-

---

साथ, यस्य = जिस पदार्थ का, अभिसम्बन्धः = सम्बन्ध होता है, दूरस्थस्य अपि = दूर रहनेवाले भी, तस्य = उस पदार्थ का, सः = वह सम्बन्ध होता है इस न्याय से ऐसा होने से अणु परिमाण की अनुपलब्धि (अग्रहण) यह लब्ध होता है। इस कारण ऐसा होने से 'स्थूल (बड़ा) नील वर्ण का कलश है' इस प्रत्यक्षज्ञान से जिस प्रकार नीलवर्णरूप विषय है उसी प्रकार (बड़ा) महत्परिमाण भी विषय है और उस परिमाण से परमाणुपर्यन्त परिमाणगुण—अणुरूप द्रव्य, परमाणु परिमाणवाला है, द्रव्य होने से घट के समान, इस अनुमान से सिद्ध होता है। और द्रव्य के प्रत्यक्ष होने से रूपगुण के समान परिमाणगुण भी कारण है, क्योंकि महत्परिमाण के बिना द्रव्य का प्रत्यक्ष नहीं होता, ऐसा होने से द्रव्य के प्रत्यक्ष में कारण होने से, स्वयं भी प्रत्यक्ष होने के कारण परिमाण नामक गुण है यह निश्चय होता है। यदि घटादि पदार्थों का स्वरूप ही परिमाण गुण हो तो उसे ले आओ ऐसा कहने पर केवल घट का आनयन होगा, (किन्तु लाता नहीं) ऐसा होने से प्रेष्ट (आज्ञा) तथा संप्रतिपत्ति (उसका ज्ञान) ये दोनों विरुद्ध हो जांयगे (अर्थात् बड़ा ले आओ ऐसी आज्ञा पाया हुआ मनुष्य 'मैं आपकी आज्ञा के विषय को कैसे निश्चित करूँ, परिमाण का लाना तो हो नहीं सकता, और बिना निश्चियके घटादि पदार्थ को लाया जाय तो आज्ञा और कार्य के विरुद्ध होने से विरोध होगा' ऐसा उत्तर देगा। (शंकरमिश्र कहते हैं कि)—परिमाण को आधाररूप मानने से घट शब्द से परिमाण का अथवा परिमाणपद से घटपदार्थ का बोध होने लगेगा।

मानव्यवहार के असाधारण (विशेष) कारण को परिमाणगुण कहते हैं, और द्रव्य के प्रत्यक्षके कारण विषय में रहनेवाले सामान्यगुण को महत्वत्व महत्परिमाण कहते हैं। 'एक हाथ' एक वितस्ती (बित्ता) इत्यादि व्यवहार यहां पर मानव्यवहार शब्द का अर्थ है, नकि पल संख्या (एक तोला) इत्यादि तौल का व्यवहार उक्त परिमाण गुण महत् अणु, दीर्घ और ह्रस्व इस भेद से चार प्रकार का है। उनमें से परम महत्

ह्रस्वादिव्यवहारः। तच्च परिमाणञ्चतुर्विधं—महत्त्वमणुत्वं दीर्घत्वं ह्रस्वत्वञ्च। तत्र परममहत्त्वपरमदीर्घत्वे विभुचतुष्टयवर्त्तिनी, परमाणुत्वपरमह्रस्वत्वे परमाणुवर्त्तिनी, अवान्तराणुत्वावान्तरह्रस्वत्वे द्व्यणुकवर्त्तिनी, त्रसरेणुमारभ्य महावयविपर्यन्तं महत्त्वदीर्घत्वे। एवञ्च सर्वाण्यपि द्रव्याणि परमाणुद्वयवन्ति। बिल्वामलकादावणुत्वव्यवहारः समिदिक्षुदण्डादिषु च ह्रस्वत्वव्यवहारो भाक्तः। भक्तिश्चात्र प्रकर्षभावाभावः। आमलके यः प्रकर्षभावस्तस्याभावः कुवले, बिल्वे यः प्रकर्षभावस्तस्याभाव आमलके, स च गौणमुख्योभयभागित्वाद् भक्तिपदवाच्य। दीर्घत्वह्रस्वत्वे नित्ये न वर्त्तेते इत्येके। परिमाण एव ते न भवत इत्यपरे। महत्सु दीर्घमानीयतामितिवद् महत्सु वर्त्तुलं त्रिकोणञ्चानीयतामितिनिर्धारणबलाद्वर्तुलत्वादीनामप्यापत्तेरिति तेषामाशयात् ॥ ८ ॥

इदानीं परिमाणकारणानि परिसङ्ख्यष्टे—

कारणबहुत्वाच्च ॥ ९ ॥

परिमाण तथा परमदीर्घ परिमाण ये दोनों आकाश से लेकर आत्मातक व्यापक चार द्रव्यों में रहते हैं, परमअणु तथा परमह्रस्व परिमाण वे दोनों परमाणुओं में रहते हैं, तथा अवान्तर (मध्यम) अणु तथा ह्रस्व ये दोनों परिमाण द्व्यणुक में रहते हैं, त्रसरेणु से लेकर घटादि महावयवि द्रव्यों में महत् तथा दीर्घ परिमाण ये दोनों रहते हैं। इससे यहाँ सिद्ध होता है कि संपूर्ण द्रव्यों में दो प्रकार के परिमाण हैं। बेल, आमलक (आंवला) इत्यादिकों में यह परिमाण होने पर भी अणु (छोटे) परिमाण को तथा समित् (समिधा की लकड़ी) इक्षु (ऊँख) तथा दण्ड (डण्डा) आदिकों में दीर्घता (लंबापन) होने पर भी ह्रस्वता का व्यवहार भी गौण होता है। प्रकर्षभाव (अधिकता) का अभाव (न होना) है भक्ति शब्द का अर्थ। अतः आमले में जो महत्परिमाण की अधिकता है उसका कुवल (कमलगट्टे) में अभाव है, और बेल में जो महत्परिमाण की अधिकता है उसका आमलेमें अभाव है, और वह गौण बेल आदिकों में तथा मुख्य घटादिकों दोनों में रहने के कारण भक्तिपद से कहा जाता है। नित्यपरमाणु आदिकों में दीर्घ तथा ह्रस्वपरिमाण नहीं रहता ऐसा कुछ विद्वानों का मत है। "दीर्घ और ह्रस्व यह पृथक् परिमाण ही नहीं है ऐसा दूसरे दार्शनिकों का मत है। क्योंकि महत्परिमाण वाले (बड़े) (बांसों में से दीर्घ (लंबे) बांस को लाओ इस व्यवहार के समान बड़े बेलों में से गोल बेल लाओ ऐसे निश्चायक व्यवहार होने से (वर्तुलता) गोल का परिमाण भी दीर्घ तथा ह्रस्व के समान मानना पड़ेगा ऐसा उनका अभिप्राय है ॥ ८ ॥

साम्प्रत परिमाणगुण के कारणों की गणना सूत्रकार करते हैं—

पदपदार्थ—कारण बहुत्वात् च=कारण में वर्तमान (बहुत्व) अनेक संख्या से भी (परिमाण उत्पन्न होता है) ॥ ९ ॥

चकारो महत्त्वप्रचयौ समुच्चिनोति। परिमाणमुत्पद्यते इति सूत्रशेषः। तत्र कारणबहुत्वं त्र्यणुके महत्त्वदीर्घत्वे जनयति महत्त्वप्रचययोस्तत्कारणेऽभावात्। तच्च बहुत्वमीश्वरापेक्षाबुद्धिजन्यं तद्बुद्धेरनेकविषयत्वेऽप्यदृष्टविशेषोपग्रहो नियामकः। एवं परमाणुद्वयगतं द्वित्वं द्व्यणुके परिमाणोत्पादकं वक्ष्यते। द्वाभ्यां तन्तुभ्यामप्रचिताभ्यामारब्धे पटे केवलं महत्त्वमेवासमवायिकारणं बहुत्वप्रचययोस्तत्राभावात् यत्र च द्वाभ्यां तूलकपिण्डाभ्यां तूलकपिण्डारम्भस्तत्र परिमाणोत्कर्षदर्शनात् प्रचयः कारणं बहुत्वस्याभावात्, महत्त्वस्य सत्त्वेऽपि परिमाणोत्कर्षं प्रत्यप्रयोजकत्वात्। एवञ्च सति यदि महत्त्व तत्र कारणं तदा न दोषः। तदुक्तं—'द्वाभ्यामेकेन सर्वैर्वा' इति। प्रचयश्च आरम्भकः संयोगः। स च स्वाभिमुखकिञ्चिदवयवासंयुक्तत्वे सति स्वाभिमुखकिञ्चिदवयवसंयोगलक्षणः। स चावय-

---

भावार्थ—कारणगत अनेक संख्या तथा सूत्र के प्रकार से संग्रह किये महत्परिमाण तथा प्रचय नामक शिथिलतासंपादक संयोगविशेष इन तीन कारणों से जन्य परिमाण की उत्पत्ति होती है ॥ ९ ॥

उपस्कार—सूत्र का चकार महत्परिमाण तथा प्रत्यय नामक संयोगविशेष इन दोनों का संग्रह करता है। 'परिमाण' उत्पन्न होता है ऐसा सूत्र में अकांक्षित पद का शेष भाग पूर्ण करना उसमें कारणबहुत्व (अनेक) संख्या त्र्यणुकद्रव्य में महत् तथा दीर्घपरिमाणरूप कार्यगुण को उत्पन्न करती है। क्योंकि त्र्यणुक के कारण द्व्यणुकरूप द्रव्य में महत् परिमाण तथा प्रचय संयोग नहीं है। और परमाणुओं में वर्तमान अनेक संख्या परमाणुओं का प्रत्यक्ष करनेवाले यह एक परमाणु है यह एक परमाणु है इस प्रकार की ईश्वर की अपेक्षाबुद्धि से उत्पन्न होती है, ईश्वरबुद्धि के अनेक विषयों में होने में भी अदृष्टविशेष, का उपग्रह (सम्बन्ध) ही नियामक है। इसी प्रकार दो परमाणुओं में वर्तमान् द्वित्वसंख्याद्व्यणुकद्रव्य में परिमाण को उत्पन्न करती है ऐसा कहा जायगा। प्रचयसंयोग से रहित को तन्तुओं से उत्पन्न पटद्रव्य में केवल महत्परिमाण ही असमवायिकारण होता है, क्योंकि उन दो तन्तुओं में अनेक संख्या तथा प्रचयरूप कारण नहीं है। और जहां दो तूलक (रूई) के पिण्ड (ढेर रूप गोलों) से एक तूलक पिण्ड (ढेर) रूप द्रव्य उत्पन्न होता है उसमें कारणपिण्डों से कार्यपिण्ड में महत्परिमाण का उत्कर्ष दिखाई पड़नेके कारण प्रचयसंयोग ही कारण है, क्योंकि उन दोनों कारणपिण्डों में अनेक संख्या नहीं है, महत्परिमाण के रहने पर भी वह कार्यपिण्ड के अधिक महत्परिमाण होने में प्रयोजक नहीं है। ऐसा होने से यदि उसमें महत्परिणाम कारण हो तो भी कोई दोष नहीं हो सकता, अतएव 'द्वाभ्यां = दोसे, एकेन = एक से, अथवा सर्वैः = संपूर्ण कारणों से ऐसा प्रशस्तदेवने भाष्य में कहा है। आरम्भक (उत्पन्न करनेवाला) संयोग प्रचय कहाता है।

वसंयोगः स्वावयवप्रशिथिलसंयोगापेक्षः परिमाणजनकः 'गुणकर्मारम्भे सापेक्ष' इति वचनात् ॥ ९ ॥

महत्त्वदीर्घत्वे व्युत्पाद्याणुत्वं व्युत्पादयति—

अतो विपरीतमणु ॥ १० ॥

अतः प्रत्यक्षसिद्धान्महतः परिमाणाद्यद्विपरीतं तदणुपरिमाणमित्यर्थः। वैपरीत्यञ्चाप्रत्यक्षत्वात् कारणवैपरीत्याच्च। महत्त्वे हि महत्त्वबहुत्वप्रचयानां कारणत्वम्। अणुत्वे च कारणगतस्य द्वित्वस्येश्वरापेक्षाबुद्धिजन्यस्य कारणत्वम्। एतेन दीर्घत्वविपरीतं ह्रस्वत्वमित्यपि द्रष्टव्यम्। वैपरीत्यञ्चात्रापि पूर्ववत् ॥१०॥

इदानीं कुवलामलकादावणुत्वव्यवहारो भाक्त इति दर्शयति—

और वह प्रचय अपने संमुख कुछ अवयवों में संयुक्त न होता हुआ अपने अभिमुख (सामने के) कुछ अवयवों से संयोगस्वरूप होता है। और वह अवयवसंयोग अपने अवयवों के अत्यन्त शिथिल (ढीले) संयोग की अपेक्षा से परिमाण को उत्पन्न करता है, क्योंकि गुणकर्मारंभे=गुण तथा क्रिया को उत्पन्न करने में, सापेक्षः= अपेक्षा करता है, ऐसा वैशेषिकसूत्रकार का वचन है ॥ ९ ॥

महत् तथा दीर्घपरिमाण का वर्णन कर अणुपरिमाण का वर्णन सूत्रकार करते हैं—

पदपदार्थ—अतः = इस प्रत्यक्ष महत्परिमाण से, विपरीतं=जो विपरीत (अप्रत्यक्ष) हो, अणु = वह अणुपरिमाण है ॥ १० ॥

भावार्थ—प्रत्यक्ष होने की योग्यतावाले महत्परिमाण से प्रत्यक्ष न होने के कारण अणुपरिमाण उससे विपरीत होता है॥ १० ॥

उपस्कार—'अतः' अर्थात् इस प्रत्यक्षासिद्ध महत् परिमाण से जो विपरीत (उलटा) होता है वह अणुपरिमाण कहाता है, यह सूत्र का अर्थ है। वह विपरीतता दो प्रकार से होती है अणुपरिमाणवाले परमाणु तथा द्वयणुक द्रव्यों के प्रत्यक्ष न होने से तथा कारण की विपरीतता से भी। क्योंकि महत्परिमाण होने में महत् परिमाण, अनेक संख्या तथा प्रचयसंयोग कारण होते हैं। और द्वयणुक द्रव्य के अणुपरिमाणरूप कार्य में परमाणुरूप कारण में वर्तमान ईश्वर की अपेक्षाबुद्धि से उत्पन्न द्वित्व संख्या कारण है। इस कथन से दीर्घपरिमाण के विपरीत ह्रस्व परिमाण होता है। यह भी देख लेना चाहिये। और यह विपरीतता भी पूर्व के समान यहाँ भी देख लेनी चाहिये ॥ १० ॥

सांप्रत कुवल (कमलगट्टा) आंवला आदि में महत्परिमाण होने पर भी अणु है यह व्यवहार गौण होता है। यह सूत्रकार स्वयं कहते हैं—

अणु महदिति तस्मिन् विशेषभावाद् विशेषाभावाच्च ॥ ११ ॥

इति शब्दो व्यवहारपरतां दर्शयति । तेन बिल्वापेक्षया कुवलमणु कुवलापेक्षयामलकं महत् आमलकापेक्षया बिल्वं महदिति तावद्व्यवहारोऽस्ति, तत्र महति तेषु व्यवहारो मुख्यः । कुत एवमत आह—विशेषभावात् महत्त्वविशेषस्यैव तरतमादिभावेन भावात्, अणुव्यवहारस्तु तेषु भाक्तः । कुत एवमत आह—विशेषभावात् अणुत्वविशेषस्य तत्राभावात् । अणुत्वं हि कार्यं द्व्यणुकमात्रवृत्ति, नित्यं तु परमाणुवृत्ति, कुवलादौ तदभावात् ।

यद्वा विशेषस्य महत्त्वकारणस्यैवावयवबहुत्वमहत्त्वप्रचयानां कुवलाद्यवयवेषु भावात् सद्भावात्, विशेषाभावाद् विशेषस्य अणुत्वकारणस्य महत्त्वासमानाधिकरणद्वित्वस्य कुवलाद्यवयवेष्वभावादसद्भावादित्यर्थः ॥ ११ ॥

पदपदार्थ—यह अणु परिमाणवाला है, महत् = यह महत्परिमाणवाला है, इति= ऐसा व्यवहार होता है, तस्मिन् = उसमें, विशेषभावात् = महत्परिमाणरूप विशेष होने से, विशेषाभावात् च = और अणुरूप विशेष न होने से, (अणुव्यवहारगौण होता है) ॥ ११ ॥

भावार्थ—बेलफल से कमलगट्टा अणु (छोटा) है ऐसा, एवं कमलगट्टे की अपेक्षा से आंवला महान् (बड़ा) है ऐसा भी व्यवहार होता है, अतः उनमें महत्परिमाण का व्यवहार महत् परिमाण के रूपविशेष तरतम (अधिक, तथा अतिअधिक) भाव से मुख्य है, तथा अणुव्यवहार जो होता है वह वस्तुतः उनमें अणुत्वरूपविशेष न होने से भाक्त (गौण) है ॥ ११ ॥

उपस्कार—सूत्र में इति शब्द व्यवहारबोधकता का दिखाई पड़ता है। इससे बेलफल से कुवल (कमलगट्टा,) अणु है, कुवल से आंवला महत्परिमाण (बड़ा) है, आंवले से बेल महत् (बड़ा) है। ऐसे व्यवहार लोकप्रसिद्ध होते हैं, उससे महत् परिमाण का उनमें व्यवहार तो मुख्य है। क्यों ? ऐसे प्रश्न के उत्तर में सूत्रकार ने 'विशेषभावात्' ऐसा हेतु दिया है, जिसका अर्थ है महत्परिमाणरूपविशेष की ही वास्तविक उनमें सत्ता होने से। और उनमें बेल से कुवल अणु है का व्यवहार गौण है ऐसा क्यों ? इस प्रश्न के उत्तर में सूत्रकार हेतु देते हैं—विशेषभावात् = अर्थात् वस्तुतः उसमें अणुत्वविशेष नहीं है। कार्यरूप अणुपरिमाण केवल द्व्यणुक द्रव्य में ही रहता है, और नित्य अणुपरिमाण केवल परिमाणुओं में रहता है। जो कुवलादिक में वस्तुतः नहीं है अथवा महत्परिमाण के कारण ही अवयवों की अनेक संख्या, महत्परिमाण, तथा प्रचयसंयोगरूप (विशेष) के कुवल आदि द्रव्यों के अवयवों में भावात्=सत्ता होने से, (विशेषभावात्) अर्थात् अणुपरिमाण के कारण तथा महत्परिमाण के अधिकरण में न रहनेवाली द्वित्वसंख्या के कुवलादिकों

अणुत्वव्यवहारो भाक्त इत्यत्र हेतुमाह—

एककालत्वात् ॥ १२ ॥

महत्त्वमणुत्वञ्च द्वयमप्येकस्मिन् कालेऽनुभूयते,ते च महत्त्वाणुत्वे परस्परविरोधिनी नैकत्राश्रये सह सम्भवतः, अतो महत्त्वकारणसद्भावान्महत्त्वप्रत्ययस्तत्र मुख्योऽणुत्वप्रत्ययप्रयोगौ च भाक्ताविस्यर्थः ॥ १२ ॥

महत्त्वप्रत्ययस्य मुख्यत्वे हेतुमाह—

दृष्टान्ताच्च ॥ १३ ॥

दृश्यते तथा वस्तुगत्या महत्स्वेव कुवलामलकबिल्वेषु स्थूलस्थूलतरस्थूलतमव्यवहारेण भवितव्यमित्यर्थः। यथा वस्तुगत्या शुक्लेष्वेव पटशङ्खस्फटिकादि षुशुक्लशुक्लतरशुक्लतमव्यवहारः ॥ १३ ॥

के अवयवों में अभावात् अर्थात् सत्ता न होने से ऐसा सूत्र का अर्थ भी जानना ॥११॥

प्रदर्शित अणु व्यवहार भाक्त है, इससे स्वयं सूत्रकार हेतु दिखाते हैं—

पदपदार्थ—एककालत्वात्=एक ही काल में होने से (अणुव्यवहार गौण है)॥१२॥

भावार्थ—एक ही समय में कुवलादिकों में महत् तथा अणुपरिमाण का अनुभव होता है, परस्पर विरोध होने से दोनों परिमाण एक आश्रयद्रव्य में नहीं हो सकते, अतः महत्परिमाण का कारण होने से महत्परिमाण का व्यवहार मुख्य, तथा अणुंपरिमाण का व्यवहार गौण है यह सिद्ध होता है ॥ १२ ॥

उपस्कार—अणु तथा महत्परिमाण दोनों का ही एक समय में अनुभव होता है, और वह महत् तथा अणुपरिमाण परस्पर विरुद्ध होने के कारण एक आश्रयद्रव्य में नहीं हो सकते, इस कारण महत्परिमाण के कारण की सत्ता होने से महत्परिमाण का कुलव, बेल इत्यादि पार्थिव द्रव्यादिकों में व्यवहार मुख्य है, तथा बेल से कमलगट्टा अणु है इत्यादि शब्द प्रयोग तथा ज्ञान दोनों भाक्त (गौण) हैं यह सूत्र का अर्थ है ॥ १२ ॥

महत्परिमाण की मुख्यता में स्वयं सूत्रकार कारण कहते हैं—

पदपदार्थ—दृष्टान्तात् च = दृष्टान्त होने से भी ॥ १३ ॥

भावार्थ—वस्तुतः श्वेतवर्णवाले भी वस्त्र शंख तथा स्फटिकमणि आदि पार्थिव द्रव्यों में शुक्ल, शुक्लतर (अधिक शुक्ल), शुक्लतम (अतिअधिक शुक्ल) इत्यादि व्यवहार होता है उसी प्रकार वस्तुतः महत्परिमाणवाले भी कुवल, आमलकादि द्रव्यों में स्थूल, स्थूलतर (अधिक स्थूल) तथा स्थूलतम (अतिअधिक स्थूल) इस प्रकार वास्तविक महत्परिमाण का व्यवहार भी होता है ॥ १३ ॥

उपस्कार—यह दिखाई पड़ता है कि इस प्रकार वास्तविक महत्परिमाण वाले ही कुवल, आमलक, बिल्वफल आदिकों में स्थूल, अधिक स्थूल, अत्यधिक स्थूल ऐसे

नन्वणु महत्परिमाणमिति व्यवहारबलान्महत्त्वे अपि परिमाणे महत्त्वम णुत्वेऽप्यणुत्वमस्तीति ज्ञायते तत् कथं द्रव्यमात्रवृत्तित्वमनयोः कथं वा गुणे गुणवृत्तित्वविरोधो नापद्यत इत्यत आह—

अणुत्वमहत्त्वयोरणुत्वमहत्त्वाभावः कर्मगुणैर्व्याख्यातः ॥ १४ ॥

यथा गुणकर्मणो नाणुत्वमहत्त्ववती तथाऽणुत्वमहत्त्वे अपि नाणुत्वमहत्त्ववती इत्यर्थः । प्रयोगश्च भाक्तो द्रष्टव्यः ॥ १४ ॥

ननु यथा गुणा गुणवन्तः,—कथमन्यथा महान् शब्दः द्वौ शब्दौ एकः शब्दः चतुर्विंशतिर्गुणा इत्यादिव्यवहारः । कर्माण्यपि च कर्मवन्ति प्रतीयन्ते

व्यवहार होने चाहिये यह सूत्र का अर्थ है । जिस प्रकार वास्तविक शुक्ल वर्ण वाले ही वस्त्र, शंख, स्फटिकादि द्रव्यों में शुक्ल १, अधिक शुक्ल २, अतिअधिक शुक्ल ३ ऐसे क्रम से व्यवहार होते हैं (यह दृष्टान्त है) ॥ १३ ॥

"अणु तथा महत् यह परिमाण हैं इस व्यवहार के बल से महत् परिमाण में भी महत्परिमाण, तथा अणुपरिमाण में भी अणुपरिमाण है ऐसा जान पड़ता है, तो महत् तथा अणुपरिणाम ये दोनों द्रव्य ही में रहते हैं ऐसा कैसे हो सकता है ? जिससे गुण में गुण के रहने का विरोध कैसे न आवेगा" इस पूर्णपक्षी की शंका के समाधानार्थ सूत्रकार कहते हैं—

पदपदार्थ—अणुत्वमहत्त्वयोः = अणु तथा महत्परिमाण दोनों में, अणुत्वमहत्वाभावः = अणु तथा महत्परिमाण दोनों का क्रम से अभाव है, (यह) कर्मगुणैः = कर्म और गुण पदार्थों में अणु तथा महत्परिमाण के न रहने से, व्याख्यातः = व्याख्या किया गया ॥ १४ ॥

भावार्थ—जिस प्रकार गुण तथा कर्मपदार्थों में अणु तथा महत्परिमाण नहीं रहता, उसी प्रकार गुण होने से अणु तथा महत्परिमाण क्रम से अणु तथा महत्परिमाण के आश्रय नहीं होते यह व्याख्यात है ॥ १४ ॥

उपस्कार—जिस प्रकार गुण तथा कर्मपदार्थ अणु तथा महत्परिमाणरूप गुण वाले नहीं होते उसी प्रकार अणु तथा महत्परिमाणरूप दोनों गुण भी क्रम से अणु तथा महत्परिमाण के आधार नहीं होते, क्योंकि गुणों में गुणों के रहने का विरोध है । पूर्वपक्षी के प्रदर्शित अणुपरिमाण है इत्यादिव्यवहार भाक्त (गौण) है ऐसा देखना चाहिये ॥ १४ ॥

यदि गुणों में गुण न माने जांय तो यह शब्द महान् (बड़ा) है, दो शब्द हैं, एक शब्द है, चतुर्विंशति गुण है, यह व्यवहार न हो सकेगा, अतः गुणों में गुण है यह सिद्ध होता है तथा शीघ्र जाता है, द्रुत (बहुत शीघ्र) जाता है इत्यादि व्यवहार के बल से क्रियापदार्थ भी क्रिया का आधार है यह सिद्ध होता है, उसी प्रकार अणु

कथमन्यथा शीघ्रं गच्छति द्रुतं गच्छतीति व्यवहारः तथा चाणुत्वमहत्त्वे अपि तद्वती स्यातामित्यत आह—

कर्मभिः कर्माणि गुणैश्च गुणा व्याख्याताः ॥ १५ ॥

कर्मभिः कर्माणि न तद्वन्ति गुणैश्च गुणा न तद्वन्तस्तथाऽणुत्वमहत्त्वेपि न न तद्वती । व्यवहारस्तु सर्वत्र भाक्त इत्यर्थः ॥ १५ ॥

ननु महान्ति कर्माणि अणूनि कर्माणि महान्तो गुणाः अणवो गुणा इत्यादिव्यवहारादणुत्वमहत्त्ववन्ति कर्माणि तदुभयवन्तश्च गुणाः प्रसक्ता इत्यत आह–

अणुत्वमहत्त्वाभ्यां कर्मगुणाश्च व्याख्याताः ॥ १६ ॥

यथाऽणुत्वमहत्त्वे नाणुत्वमहत्त्ववती तथा न कर्माणि तदुभयवन्ति न वा गुणास्तदुभयवन्त इत्यर्थः । प्रयोगस्तु पूर्ववद्भाक्त इति भावः ॥ १६ ॥

तथा महत्परिमाण भी अणु तथा महत् परिमाण आश्रय हो जायंगे । इस पूर्वपक्षी की शंका के समाधान में सूत्रकार कहते हैं—

पदपदार्थ—कर्मभिः = कर्मपदार्थों से, कर्माणि = कर्मपदार्थ, गुणैः च = और गुणपदार्थों से, गुणाः = गुणपदार्थ, व्याख्याताः = व्याख्या किये गये ॥ १५ ॥

भावार्थ—जिस प्रकार विरोध होने से क्रियापदार्थ में क्रिया नहीं रहती, गुणपदार्थ गुणों में नहीं रहते, उसी प्रकार अणु तथा महत्परिमाण भी अणु तथा महत्परिमाण के आश्रय नहीं होते, पूर्वपक्षी के दिखाये व्यवहार भाक्त हैं ॥ १५ ॥

उपस्कार—जिस प्रकार क्रियापदार्थों से क्रियापदार्थ आश्रय नहीं होते, गुणपदार्थों से भी गुणपदार्थ आश्रित नहीं होते, इसी प्रकार अणु तथा महत्परिमाण भी क्रम से अणु तथा महत्परिमाण के आश्रित नहीं होते । व्यवहार तो संपूर्ण भाक्त होता है यह सूत्र का अर्थ है ॥१५ ॥

किन्तु जिस समय द्वित्वगुण के आधारद्रव्य के अवयवों में क्रिया तथा अपेक्षाबुद्धि ये दोनों से एक समय में होते हैं, उस समय उन आश्रय का नाश तथा अपेक्षाबुद्धि का नाश दोनों मिलकर द्वित्वगुण का नाश होता है। वह इस प्रकार है कि अवयव में क्रिया और अपेक्षाबुद्धि, उनसे क्रम से अवयव विभाग तथा द्वित्वगुण की उत्पत्ति, उनसे पूर्वसंयोग का नाश तथा द्वित्वत्व सामान्य का ज्ञान,

गुणोत्पत्तौ द्रव्यनाशद्वित्वसामान्यज्ञाने तत्र द्रव्यनाशाद्द्वित्वनाशः, सामान्यज्ञानादपेक्षाबुद्धिनाशः, अपेक्षाबुद्धिनाशस्य द्वित्वनाशसमानकालत्वात् कार्यकारणसमानभावाभावात्।

यदा तु द्वित्वाधारावयवकर्मापेक्षाबुद्ध्योर्यौगपद्यं तदा द्वाभ्यामाश्रयनाशापेक्षाबुद्धिनाशाभ्यां द्वित्वनाशः। तद्यथा अवयवकर्मापेक्षाबुद्धी विभागोत्पत्तिद्वित्वोत्पत्ती संयोगनाशद्वित्वसामान्यज्ञाने द्रव्यनाशापेक्षाबुद्धिनाशौ ताभ्यां द्वित्वनाशः प्रत्येकं सामर्थ्यग्रहात्। इयञ्च प्रक्रिया ज्ञानयोर्वध्यघातकपक्षे परमुपपद्यते स एव च पक्षः प्रामाणिकः।

ननु द्वित्वत्रित्वादीनां सामग्रीसाम्ये कथं कार्यवैलक्षण्यं ? द्वाभ्यामेकत्वाभ्यां द्वित्वं त्रिभिरेकत्वैस्त्रित्वमिति चेन्न एकत्वे द्वित्वाद्यभावात्। समवायिकारणगतमेव द्वित्वत्रित्वादिके तन्त्रमिति चेन्न द्वित्वाद्युत्पत्तेः पूर्वं तत्र द्वित्वाद्यभावात्, तत्रापि कारणचिन्ताया अनिवारणात् अपेक्षाबुद्धावेकत्वेषु च तादृशविशेषस्या-

---

उनसे क्रम से द्रव्य का नाश तथा अपेक्षाबुद्धि का नाश होता है, और उन दोनों से द्वित्व का नाश होता है, क्योंकि प्रत्येक द्वित्वनाश के सामर्थ्य होने का ग्रहण होता है। किन्तु यह प्रक्रिया दो ज्ञानों के परस्पर वध्यघातक (नाश्यनाशक) रूप विरोध मानने के पक्ष भी हो सकती है, नकि सहानवस्थान को ज्ञानों के साथ में न रहनेरूप विरोध पक्ष में (क्योंकि इस पक्ष ही में दो द्रव्य हैं ऐसे विशिष्ट द्रव्यज्ञान की उत्पत्ति न होगी ऐसा प्रशस्तपादभाष्य में देख लेना चाहिये)। शंकरमिश्र कहते हैं कि वध्य घातक पक्ष ही इस कारण भाष्यमत के अनुसार प्रामाणिक है। (त्रित्वादि संख्या के मानने के विषय में विवाद होने से पूर्वपक्षिमत से शंका दिखाते हुए शंकरमिश्र कहते हैं कि)—जब द्वित्व त्रित्व आदि संख्याओं की अपेक्षाबुद्धिरूप सामग्री समान है तो कार्य संख्याओं में विलक्षणता कैसे होगी ? 'यदि दो एक संख्याओं से द्वित्व संख्या तथा तीन एक संख्याओं से त्रित्व संख्या होती है इस कारण कार्यों में विलक्षणता होती है' ऐसा सिद्धान्ती कहे तो यह नहीं हो सकता, क्योंकि एक संख्यारूप गुण में (गुणों में गुण का रहने का विरोध होने के कारण) द्वित्वादि संख्यारूप गुण नहीं हो सकता। समवायिकारण में वर्तमान ही द्वित्व-त्रित्व आदि प्रयोजक होगा' ऐसा भी नहीं कह सकते, क्योंकि द्वित्वादि गुणों के उत्पत्ति के पूर्व में द्वित्वादि गुण नहीं हैं। और उसका भी क्या कारण है ? यह चिन्ता दूर न होगी। अपेक्षाबुद्धि तथा अनेक एक संख्याओं में भी ऐसा कोई कार्य में विलक्षणता ले आनेवाला विशेष उपलब्ध नहीं होने से बाधित है। यदि विलक्षण कार्यरूप फल के बल से ऐसा विशेष उनमें माना जाय तो द्वित्व-त्रित्वादि कार्य का व्यवहार भी उसी विशेष से हो जायगा तो द्वित्वादि मानने की भी क्या आवश्यकता है ? यदि अदृष्ट को विशेष से द्वित्व त्रित्व आदि संख्या कार्य ये

नुपलम्भबोधित्वात्, फलबलेन तत्कल्पने, वा द्वित्वादिव्यवहारोऽपि तत एवास्तु किं द्वित्वादिना। अदृष्टविशेषाद्विशेष इति चेदेवं सति द्वित्वारम्भकयाऽपि सामग्र्या कदाचित्त्रित्वं चतुष्ट्वञ्चोत्पद्येतेत्यनियमप्रसङ्गः।

अत्रोच्यते—प्रागभावविशेषाद्विशेषोपपत्तेः, यथा तुल्यया सामग्र्या पाकजानां रूपरसगन्धस्पर्शानाम्। प्रागभावोऽपि साधारण एवेति चेन्न स्वस्वप्रागभावस्यैव कार्यं प्रति कारणत्वावधारणात्। यद्वा शुद्धयाऽपेक्षाबुद्ध्या द्वित्वं द्वित्वसहितया त्रित्वमिति नेत्थम्। शतं पिपीलिकानां मया हतमित्यादौ समवायिकारणाभावे द्वित्वं तावन्नोत्पद्यते तथाच गौणस्तत्र सङ्ख्याव्यवहारो द्रष्टव्यः। सेनावनादौ नियतापेक्षाबुद्ध्यभावाद्बहुत्वमात्रमुत्पद्यते न तु शतसहस्रादिसङ्ख्येति श्रीधराचार्याः। एवं सति शतसहस्रादिकोटिकस्तत्रसंशयो न स्यात्, न स्याच्च महती महत्तरा सेनेति नैवमित्युदयनाचार्याः।

अत्रैवमालोचनीयम्—त्रित्वादिपरार्द्धपर्यन्ता सङ्ख्यैव बहुत्वम्, तद्भिन्नं वा वा सङ्ख्यान्तरम्? नाद्यः सेनावनादावपि शतसहस्रादिसङ्ख्योत्पत्तिनियमात्।

विलक्षणता मानें, तो ऐसा होने पर द्वित्व की उत्पादक सामग्री से भी कदाचित् त्रित्व संख्या तथा चतुष्ट्व (चार) संख्या भी उत्पन्न होने लगेगी ऐसे अनियम (नियम न होने) की आपत्ति आवेगी।

(इस पूर्वपक्ष का समाधान शंकरमिश्र ऐसा करते हैं कि)—इस पूर्वपक्ष पर ऐसा कहा जाता है कि—प्रागभाव के विशेष से कार्य में विशेषता हो जा सकती है, जिस प्रकार तेजसंयोगरूप पाक के कारण की सामग्री एक होने पर भी रूपप्रागभावादि रूप कारण की विशेषता से रूप, रस, गन्ध तथा स्पर्श कार्यों में विशेषता होती है। यदि पूर्वपक्षी कहे कि 'प्रागभाव भी तो साधारण ही है' तो यह नहीं हो सकता। अपने-अपने कार्य का प्रागभाव ही उन-उन कार्यों में कारण होता है, यह, निश्चित है। अथवा शुद्ध अपेक्षाबुद्धि से द्वित्वसंख्या, तथा दित्वसहित अपेक्षाबुद्धि से त्रित्वसंख्या इस प्रकार विशेष बना लेना। 'शतं=सौ, पिपीलिकानां = चिऊँटियों को,मैंने=मयाहृतं = मारा इत्यादि प्रतीति में पिपीलिकारूप समवायिकारण के न रहने से द्वित्वादि संख्या तो उत्पन्न नहीं हो सकती, अतः उनमें शत संख्या का व्यवहार गौण होता है यह देख लेना चाहिये। सेना, वन, इत्यादिकों में नियमित अपेक्षाबुद्धि न होने से केवल बहुत्वरूप संख्या उत्पन्न होती है, नकि शत(सौ), सहस्र (हजार) इत्यादि संख्या 'ऐसा कन्दलीकार श्रीधराचार्य का मत है। ऐसा मानने से सेनावनादिकों में शत (सौ है) अथवा सहस्र हैं ऐसे अनेक कोटि वाला जो संशय होता है वह न होगा। इस कारण श्रीधराचार्य का मत असंगत है ऐसा उदयनाचार्य का मत है। किन्तु यहाँ पर यह समालोचन हो सकती है—कि त्रित्व से लेकर परार्धपर्यन्त संख्या ही है बहुत्व संख्या अथवा उससे भिन्न संख्या? सेना, वन

न द्वितीयः त्रित्वादिविलक्षणस्य बहुत्वस्याननुभवात्। तथाच प्रतिनियतैकत्वा नालम्बनापेक्षाबुद्धिजनितशतादिसङ्ख्यैव बहुत्वं शताद्यभिव्यक्तिस्तु तत्र न भवति तादृशव्यञ्जकाभावात्।

वयन्तु ब्रूमः-त्रित्वादिसमानाधिकरणं सङ्ख्यान्तरमेव बहुत्वं त्रित्वादिजनकापेक्षाबुद्धिजन्यं प्रागभावभेदादेवं भावः कथमन्यथा-'बहवस्तावत् सन्ति शतं वा सहस्रं वेति विशिष्य न जानीम' इति। यथैकद्रव्ये महत्त्वं दीर्घत्वञ्च तथैकत्रैवाधिकरणे त्रित्वादिकं बहुत्वञ्च। भवति हि 'शतं वा सहस्रं वा चूतफलान्यानयामीति ?' प्रश्ने बहवस्तावदानीयन्तां किं विशेषजिज्ञासयेति। एवञ्च द्वित्वसहितापेक्षाबुद्ध्या त्रित्वं त्रित्वसहितापेक्षाबुद्ध्या चतुष्ट्वमेवमुत्तरोत्तरम् बहुत्वोत्पत्तौ तु नापेक्षाबुद्धौ पूर्वपूर्वसङ्ख्याविशिष्टत्वनियमः। अत एव सेनावनादिषु बहुत्वमात्रमुत्पद्यते न तु सङ्ख्यान्तरं संशयस्त्वसत्कोटिकोऽपि भवत्ये-

---

आदिकों में भी शत सहस्र आदि संख्या के उत्पत्ति का नियम होने के कारण प्रथम पक्ष नहीं हो सकता और त्रित्वादिकों से विलक्षण बहुत्व संख्या का अनुभव न होने के कारण द्वितीय पक्ष भी नहीं हो सकता। ऐसा होने से प्रतिनियत प्रत्येक पदार्थ में होने वाली एक संख्या को आश्रय न करने वाली अपेक्षाबुद्धि से उत्पन्न शत आदि संख्या ही बहुत्वसंख्या है किन्तु शत (सौ) आदि संख्याओं की सेनावनादिकों में अभिव्यक्ति (प्रकटता) वहाँ सेना वन आदि में बहुत्व में शतादि संख्या का अभिव्यञ्जक (प्रकट करने वाला) न होने से नहीं होती।

शंकरमिश्र कहते हैं—कि हम तो ऐसा कहते हैं कि त्रित्वादि संख्या के अधिकरण रहनेवाली बहुत्व एक दूसरी ही संख्या है जो त्रित्वादि संख्या की उत्पादक अपेक्षाबुद्धि से उत्पन्न होती है, प्रागभाव के भेद से ऐसा भेद है, अन्यथा ऐसा न हो तो बहुत से हैं किन्तु सौ हैं अथवा हजार हैं यह विशेषरूप से नहीं जानते ऐसा ज्ञान कैसे होगा। जिस प्रकार एक बाँस आदि द्रव्य में महत्परिमाण तथा दीर्घ (लम्बा) परिमाण भी होता है उसी प्रकार एक ही आधार में त्रित्वादि संख्या तथा बहुत्व संख्या भी रहती है। क्योंकि आम्रफल सौ हैं अथवा हजार ? ऐसा प्रश्न करने पर, बहुत से ले आओ विशेष जिसकी क्या आवश्यकता है, ऐसा उत्तर लोग देते हैं। ऐसा होने के कारण द्वित्वसंख्या सहित अपेक्षा बुद्धि से त्रित्वसंख्या तथा त्रित्व सहित अपेक्षाबुद्धि से चतुष्ट्व (चार) संख्या उत्पन्न होती है इसी प्रकार पांच आदि उत्तर-उत्तर संख्याओं की उत्पत्ति होती है यह जान लेना चाहिये। किन्तु बहुत संख्या की उत्पत्ति में अपेक्षाबुद्धि का पूर्व-पूर्व संख्या युक्त ज्ञान होने का नियय नहीं है। इसी कारण सेना, वन आदिकों में केवल बहुत्वसंख्या उत्पन्न होती है दूसरी त्रित्वादि संख्या नहीं, सेना, वनादिकों में शत हैं अथवा हजार ऐसा संशय तो असत् पक्ष को लेकर भी हो ही सकता है।

वेति। 'तत्समानाधिकरणञ्च पृथक्त्वमिति यथा द्वित्वं तथा द्विपृथक्त्व' मित्यादि। ननु द्वित्वत्रित्वादिसमानाधिकरणैरेकपृथक्त्वैरेव तद् व्यवहारोपपत्तौ किं द्विपृथक्त्वादिनेति चेन्न घटात् पटलोष्टौ पृथगिति-द्विपृथक्त्वस्यान्योन्यावाधिकत्वाप्रतीतेः प्रत्येकपृथक्त्वे च तत्प्रतीतेरिति वैधर्म्यात्। न चैवं द्विपरत्वापत्तिः द्वित्वसमानाधिकरणाभ्यां परत्वाभ्यामेव तदुपपत्तेः। यथा पृथक्त्वे परस्परावधिकत्वविरोधस्तथा न परत्वे, द्वाविमौ पराविति द्वाविमौ नीलावितिवदुपपत्तेः समानदेशस्थयोः संयुक्तसंयोगभूयस्त्वसाम्येऽपि दिक्पिण्डसंयोगस्यासमवायिकारणस्य भेदेन भिन्नकार्योत्पत्तिसम्भवात्। मिलितयोरेकत्वयोर्द्वित्वं प्रति यथाऽसमवायिकारणत्वं तथा मिलितयोरेकपृथक्त्वयोर्द्विपृथक्त्वं प्रत्यसमवायिकारणत्वसम्भवात् द्रव्यातिरिक्तमेकं कार्यं प्रत्यनेकेषां संयोगानां कार्यैकार्थसमवायप्रत्यासत्त्या

(पूर्वप्रदर्शित 'तत्समानाधिकरणं च पृथक्त्वं' उस एकत्वादिकों के आश्रय में पृथक्त्व रहता है इत्यादि भाष्य का शंकरमिश्र विवरण करते हुए कहते हैं कि)—एक भाष्य का यह अर्थ है कि जिस प्रकार द्वित्वसंख्या है उसी प्रकार द्विपृथक्त्वादि गुण भी हैं इत्यादि जानना। द्वित्व तथा त्रित्वादि संख्या के आश्रय में वर्तमान अनेक एकपृथक्त्व गुणों से ही द्विपृथक्त्वादि दो पृथक् हैं ? ऐसा व्यवहार हो सकने के कारण द्विपृथक्त्वादि गुण मानने की क्या आवश्यकता है ? इस शंका का उत्तर यह है कि ऐसा नहीं हो सकता, घट से पट तथा लोष्ठ (मिट्टी का ढेला) दोनों पृथक् हैं इस द्विपृथक्त्व में परस्पर अवधि की प्रतीति नहीं होती और प्रत्येक के पृथक्त्व में अवधि की प्रतीति होती है ऐसा वैषम्य है। इसी प्रकार द्विपृथक्त्व के समान द्विपरत्व आदि भी पृथक् होने लगेंगे। ऐसा पूर्वपक्षी नहीं कह सकता, क्योंकि, द्वित्वसंख्या के अधिकरण में वर्तमान दो परत्व गुणों से ही द्विपरत्व का निर्वाह हो सकता है। जिस प्रकार पृथक्त्व गुण में परस्पर अवधि होने का विरधो है उस प्रकार परत्व गुण में नहीं है, क्योंकि वे दोनों नील वर्ण के हैं इस प्रतीति के समान ये दोनों पट हैं ऐसी प्रतीति हो सकती है। क्योंकि समान देश में वर्तमान दो द्रव्यों में संयुक्त संयोग की अधिकता समान होने पर भी असमवायिकरणरूप दिशा तथा पिण्ड (द्रव्य) के संयोग के भिन्न होने से भिन्न कार्य की उत्पत्ति हो सकती है। कारण न होने से द्विपृथक्त्वरूप कार्य कैसे होगा ? (इस प्रश्न के उत्तर में दृष्टान्त द्वारा द्विपृथक्त्वरूप कार्य की सिद्धि करते हुए शंकरमिश्र कहते हैं कि)—जिस प्रकार मिली हुई एक संख्या द्वित्व संख्या में असमवायिकारण होती है उसी प्रकार मिले हुये दो-एक पृथक्त्वगुण द्विपृथक्त्वगुणरूप कार्य में असमवायिकारण हो सकते हैं। द्रव्यभिन्न एक कार्य में अनेक संयोग कार्य के साथ एक अर्थ में सन्निकर्ष से मिलकर कार्य को उत्पन्न करते हैं। यह देखने में नहीं आता। किन्तु कार्य के समवायि-

सम्भूयारम्भकत्वादर्शनात् । कारणैकार्थप्रत्यासत्त्या तु बहवस्तन्तुतुरीसंयोगा एकं पटतुरीसंयोगमारभन्त एवेति दिक् । द्वित्वादिविनाशवद्द्विपृथक्त्वादिविनाशोऽप्यूहनीयः ॥ ८ ॥

प्रकरणान्तरमारभते—

अन्यतरकर्मजः उभयकर्मजः संयोगजश्च संयोगः ॥ ९ ॥

संयोगे संयुक्तप्रतीतिरबाधिता प्रमाणं कार्याणि च,—अवयवसंयोगेषु द्रव्यमग्निसंयोगे पाकजा रूपादयः प्रचये परिमाणविशेषः भेर्याकाशसंयोगे शब्द इत्याद्यूह्यम् । न चाविरलोत्पत्तिरेव संयोगः, क्षणभङ्गपरिणामयोर्निरासात् ।

अप्राप्तिपूर्विका प्राप्तिः संयोगः । स चान्यतरकर्मजः—क्रियावता श्येनेन निष्क्रियस्य स्थाणोस्तदभिमुखक्रियारहितस्य सक्रियस्यापि धावतः यथा धावता

कारण के साथ एक पदार्थ में संनिकर्ष होने से बहुत से तन्तु तथा तुरी के संयोग एक पट तथा तुरी के संयोग को उत्पन्न करते ही हैं—यह रीति है । द्वित्वादि संख्या के नाश के समान द्विपृथक्त्व आदि गुणों का भी नाश होता है यह भी स्वयं जान लेना चाहिये ॥ ८ ॥

दूसरा संयोग का प्रकरण सूत्रकार आरम्भ करते हैं—

पदपदार्थ—अन्यतरकर्मजः = दो द्रव्यों में से किसी एक द्रव्य की क्रिया से उत्पन्न, (१) उभयकर्मजः = दोनों द्रव्यों की क्रिया से उत्पन्न, (२) संयोगजः च=और संयोग से उत्पन्न भी, (३) संयोगः = संयोगगुण होता है ॥ ९ ॥

भावार्थ—ये संयुक्त हैं इत्यादि अबाधित ज्ञान तथा द्रव्यादिरूप कार्य से सिद्ध संयोग नामक गुण, दो द्रव्यों में से किसी एक द्रव्य की क्रिया से उत्पन्न १, दोनों द्रव्यों की क्रिया से उत्पन्न २ तथा संयोग से उत्पन्न ३ । ऐसे तीन प्रकार के संयोग गुण होते हैं ॥ ९ ॥

उपस्कार—'ये संयुक्त हैं' ऐसी बाधरहित संयुक्त प्रतीति तथा कार्य भी संयोग नामक गुण है, इसमें प्रमाण है । वह कार्य ऐसे हैं कि अवयवों के संयोग होने में अवयविरूप द्रव्य, अग्निसंयोगरूप पाक में पाक से बदलने वाले रक्त आदि रूप प्रचय में परिमाण का विशेष तथा भेरी और आकाश के संयोग में शब्द कार्य इत्यादि स्वयं जान लेना । बौद्ध निरन्तर उत्पत्ति को ही संयोग मानता है किन्तु यह नहीं हो सकता, क्षण-क्षण में वस्तु का नाश तथा परिमाण दोनों का नैयायिकों ने खण्डन किया है ।

जो पूर्व में प्राप्त (मिले) न थे ऐसे दो या अनेक द्रव्यों की प्राप्ति (मिलने) को संयोग कहते हैं । वह संयोग प्रथम अन्यतर क्रिया से उत्पन्न वह है जैसे एक क्रिया वाले

पुरुषान्तरेण पृष्ठदेशसंयोगः। उभयकर्मजः—मेषयोर्मल्लयोर्वा प्रत्येकं गृहीतसामर्थ्याभ्यामुभ्यामेव तज्जननात्। तृतीयस्त्वङ्गुलितरुसंयोगाद्धस्ततरुसंयोगः। स चैकस्मादपि भवति यथा—तन्तुवीरणसंयोगात् पटवीरणसंयोगः। क्वचिद्द्वाभ्यां संयोगाभ्यामेकः संयोगः यथा—द्वाभ्यां तन्तुभ्यामाकाशस्य द्वौ संयोगौ ताभ्यामेक एव द्वितन्तुकपटस्याकाशेन संयोगः। कचिच्च बहुभिरपि संयोगैरेकः संयोग आरभ्यते यथा—दशभिस्तन्तुभिराकाशस्य दश संयोगा एकमेव दशतन्तुकपटाकाशसंयोगमारभन्ते। क्वचित् पुनरेकस्मादपि संयोगादसमवायिकारणात् संयोगद्वयमुत्पद्यते यथा—पार्थिवाप्ययोः परमाण्वोः प्रथममनारम्भके संयोगे जाते पार्थिवे परमाणौ पार्थिवपरमाण्वन्तरेण, आप्ये च परमाणावाप्यपरमाण्वन्तरेण, द्व्यणुकद्वयारम्भकं संयोगद्वयमुत्पद्यते, ताभ्यां संयोगाभ्यां सजातीयनिष्ठाभ्यां द्व्यणुकद्वयं युगपदारभ्यते, तत्र यः पार्थिवाप्यपरमाण्वोरनारम्भकः संयोग

श्येन (बाज) पक्षी की झपट्टारूप क्रिया से क्रियारहित स्थाणु (वृक्ष) का जो बाज पक्षी के सामने कोई क्रिया नहीं करता अथवा क्रियारहित होने से दौड़नेवाले पुरुष का न दौड़ने वाले निष्क्रिय दूसरे पुरुष के पृष्ठदेश (पीठ) में संयोग १, दूसरा उभय (दोनों) की क्रिया से संयोग वह होता है जैसे दो मेढे अथवा दो मल्लख (पहलवानों) का संयोग, क्योंकि प्रत्येक मेढा या मल्ल में क्रिया का सामर्थ्य होने के कारण दोनों के क्रिया ही से मेष तथा मल्ल का परस्पर संयोग होता है २। तीसरा संयोगजन्य संयोग वह है जैसे अंगुली के क्रियासे उत्पन्न वृक्ष के संयोग से उत्पन्न हस्त तथा वृक्ष का संयोग होता है। और वह संयोगजन्य संयोग एक संयोग से भी उत्पन्न होता है। जैसे तन्तु तथा वीरण के एक संयोग से पट तथा वीरण का संयोग। कहीं दो संयोग से एक संयोग होता है, जैसे तन्तुओं से आकाश के साथ दो संयोग होते हैं और उन दो संयोगों से एक ही दो तन्तुवाले पट का आकाश के साथ संयोग होता है। कहीं बहुत से संयोगों से एक संयोग उत्पन्न होता है, जैसे दस तन्तुओं से आकाश के दस संयोग एक ही दस तन्तु वाले पट तथा आकाश के संयोग को उत्पन्न करते हैं। और कहीं तो एक ही असमवायिकारण संयोग से दो संयोग उत्पन्न होते हैं, जैसे पृथिवी तथा जल के दो परमाणुओं का प्रथम द्रव्य को न उत्पन्न करने वाला संयोग उनमें से होने पर एक पृथिवी के परमाणु में दूसरे पृथिवी परमाणु का, तथा एक जलीय परमाणु में दूसरे जलीय परमाणु का संयोग होने से पार्थिव तथा जलीय दो द्व्यणुक द्रव्यों को उत्पन्न करनेवाले दो संयोग उत्पन्न होते हैं, और उन दोनों संयोगों से (जो अपने समान जातिय वाले में हैं) एक ही समय में पार्थिव तथा जलीय दो द्व्यणुक उत्पन्न होते हैं, उसमें जो पार्थिव तथा जलीय दो परमाणुओं का द्व्यणुक को उत्पन्न करनेवाला संयोग उत्पन्न हुआ था उसे एक ही संयोग से पार्थिव परमाण और जलीय द्व्यणुक के साथ एक संयोग तथा जलीय परमाणु और पार्थिव द्व्यणुक

उत्पन्नस्तेनैकेनैव पार्थिवपरमाणुनाऽऽप्यद्व्यणुकेनैकः संयोगः आप्यपरमाणुना पार्थिवद्व्यणुकेनापरः संयोगो द्व्यणुकयो रूपाद्युत्पत्तिसमकालमेव जायते, कारणाकारणसंयोगेन कार्याकार्यसंयोगयोरवश्यं जननात् ।

मूर्त्तैर्विभूनामन्यतरकर्मज एव । विभुनोस्तु न संयोगः कारणाभावात् कर्म तावत्तत्र नास्ति न च कारणं तेन कारणाकारणसंयोगात् कार्याकार्यसंयोगोऽपि नास्ति । नित्यस्तु संयोगो न सम्भवति अप्राप्तिपूर्विकायाः प्राप्तेः संयोगत्वात् नित्यत्वे तद्विघातात् एवञ्च सति विभागोप्यजतस्तत्र स्यात् । न चेष्टापत्तिः संयोगविभागयोर्विरोधिनोरविनश्यदवस्थयोरेकत्रानुपपत्तेः । किञ्च संयोगं प्रति प्रयोजिका युतसिद्धिः, न च विभुनोस्तत्सम्भवः । सा हि द्वयोरन्यतरस्य वा पृथग्गतिमात्रं युताश्रयाश्रयित्वं वा ।

विनाशस्तु संयोगस्य समानाधिकरणाद्विभागादाश्रयनाशदपि क्वचित् यथा तन्तुद्वयसंयोगानन्तरमेकस्य तन्तोरवयवेंऽशौ कर्म जायते तेनांश्वन्तरा-

---

के साथ दूसरा संयोग भी पार्थिव तथा जलीय द्वयणुकों में रूपादि कार्य के उत्पत्ति के समय में ही उत्पन्न होता है, क्योंकि कारण तथा अकारण के संयोग से कार्य तथा अकार्य का संयोग अवश्य होता है ।

मूर्त द्रव्यों के साथ व्यापक आकाशादि द्रव्यों का संयोग एक मूर्त द्रव्यों की ही क्रिया से उत्पन्न होने के कारण (अन्यतर क्रियाजन्य) ही होता है । दो व्यापक द्रव्यों का संयोग नहीं होता, क्योंकि क्रिया होने का कारण न होने से व्यापक द्रव्य में क्रिया नहीं होती, न तो व्यापक द्रव्य का कारण होता है, अतः कारण तथा अकारण के संयोग से उनमें कार्य तथा अकार्य का संयोग भी नहीं है ।

अप्राप्तिपूर्वक प्रदिप्त के संयोग होने के कारण नित्य संयोग नहीं हो सकता, नित्य मानने से उक्त लक्षण का विघात (अनुपपत्ति) हो जायगी और नित्य संयोग के समान नित्य विभाग गुण भी मानना पड़ेगा । विरोधी तथा विनाशी अवस्था में न रहनेवाले दो संयोग तथा विभाग गुणों का एक आधार द्रव्य में रहना अयुक्त होने के कारण, विभाग भी नित्य मान लेंगे ऐसी इष्टापत्ति (मान लेना) भी असंगत है । और संयोग होंने में आधार द्रव्यों का युत (पृथक्) सिद्धि (होना) भी कारण है, दो व्यापक द्रव्यों में पृथक् रहने का संभव ही नहीं है । क्योंकि वह दो द्रव्य अथवा दो मे से किसी एक द्रव्य में भिन्न गति का आधार होना अथवा भिन्न आधार द्रव्यों के आश्रय से रहना युतसिद्धि होती है ।

संयोग के आश्रय में वर्तमान विभाग से संयोग गुण का नाश होता है, और कहीं संयोगाधारी द्रव्य के नाश से भी संयोग का नाश होता है, जैसे दो तन्तुओं के संयोग के पश्चात् एक तन्तु के अंशुरूप अवयव से क्रिया उत्पन्न होती है, जिससे दूसरे अंशु-

द्विभागः क्रियते विभागादारम्भकसंयोगनाशस्ततस्तन्तुविनाशस्तन्तुविनाशात् संयोगनाशो यत्र तन्तुद्वयं चिरं संयुक्तं सदनुत्पन्नक्रियं भवति।

केचित्तु तन्त्ववयवकर्मणा यदा तन्त्वारम्भकसंयोगनाशः क्रियते तदा तन्त्वन्तरे कर्मचिन्तनात् आश्रयनाशविभागाभ्यां युगपदुत्पन्नाभ्यां संयोगो नश्यतीत्याहुः ।

तच्चानुपपन्नं समवायिकारणनाशक्षणे विभागानुत्पत्तेः समवायिकारणस्य कार्यसमकालस्थायित्वनियमात्। स चायं संयोगो द्रव्यारम्भे निरपेक्षो, गुणकर्मारम्भे सापेक्षः, स्वसमानाधिकरणात्यन्ताभावप्रतियोगी तथैवानुभवात्।

रूप अवयव से विभाग किया जाता है, विभाग से तन्तु के आरम्भक संयोग का नाश होता है, उससे तन्तु का नाश होता है और तन्तु के नाश से संयोग नाश होता है जहाँ पर दोनों तन्तु चिरकाल तक क्रिया को उत्पन्न न करते हुए आपस में संयुक्त रहते हैं।

तन्तु के अवयव की क्रिया से जब तन्तु के उत्पादक संयोग का नाश किया जाता है तब दूसरे तन्तु में क्रिया मानने से आश्रय का नाश तथा विभाग दोनों से मिलकर (जो एक ही समय में उत्पन्न हुए हैं) संयोग नष्ट होता है ऐसा कुछ दर्शनिकों का मत है। किन्तु समवायिकारण द्रव्य के नाश के क्षण में विभाग न हो सकने के कारण यह मत असंगत है, क्योंकि समवायिकारण कार्य के काल तक स्थिर होता है यह नियम है। यह सह द्रव्य गुण तथा क्रिया का कारण संयोग द्रव्य को उत्पन्न करने में किसी की अपेक्षा नहीं रखता और गुण तथा क्रिया को उत्पन्न करने में अपेक्षा करता है (जैसे तन्तु संयोग द्रव्य पट के एक आत्मा तथा मन का संयोग बुद्धि आदि गुणों के प्रयत्नवान् आत्मा का संयोग हस्तक्रिया का इत्यादि उदाहरण जानना)। इसी में शंकरमिश्र ने विशेष दिखाया है कि—द्रव्यारम्भ में निरपेक्ष होता है ऐसा। अर्थात् द्रव्य की उत्पत्ति में संयोग अपने आश्रय तथा निमित्त को छोड़कर दूसरे की आवश्यकता नहीं रखता। नकि पश्चात् होने वाले दूसरे निमित्त की आवश्यकता रखता है। अन्यथा श्यामरूप के नाश के उत्तरकाल में होनेवाले अन्तिम परमाणु अग्निसंयोग पारक से उत्पन्न होनेवाले गुणों को उत्पन्न करने में निरपेक्ष कारण होने लगेगा ऐसी आपत्ति आ जायगी। गुण तथा कर्म को उत्पन्न करने में वह संयोग सापेक्ष होता है इस शंकरमिश्र की उक्ति का रूपादि गुणों की उत्पत्ति में अग्निसंयोग उष्णता की अपेक्षा रखता है, क्रिया की उत्पत्ति में भी भेदन तथा अभिघातसंयोग उष्णस्पर्श तथा वेग की अपेक्षा करते हैं यह आशय है। तथा यह संयोगगुण अपने आश्रय में वर्तमान अपने अत्यन्ताभाव का प्रतियोगी होता है अर्थात् अव्याप्य वृत्ति है क्योंकि अग्रभाग में वृक्ष कपि के संयोग का आश्रय है न कि

शाखामात्रावच्छेदेनापि महति न्यग्रोधतरौ वर्त्तमानः कपिसंयोगः "न्यग्रोधतरौ कपिसंयोग" इत्यनुभवात्। अवच्छेदमात्रेणान्यथासिद्धौ परमाणुवृत्तिरापद्येत तथा च नोपलभ्येत। विभूनामप्युपाधिभेद एव प्रदेशस्तदवच्छेदेन वर्त्तमानस्य संयोगस्याऽव्याप्यवृत्तित्वं परमाणुनिष्ठस्यापि संयोगस्य दिगादयोऽवच्छेदकाश्चिन्तनीयाः॥ ९ ॥

विभागे संयोगोत्पत्तिप्रकारमतिदिशन्नाह—

एतेन विभागो व्याख्यातः ॥ १० ॥

संयोगवद्विभागोऽप्यन्यतरकर्मज उभयकर्मजो विभागजश्च। श्येनकर्मणा स्थाणुश्येनविभागः, संयुक्तयोर्मल्लयोर्मेषयोर्वा कर्मभ्यां तदुभयविभागः। स

मूलभाग से ऐसा अनुभव होता है। मूल तथा शाखा ही क्रम से संयोग तथा उसके अभाववाले क्यों नहीं मानते इस शंका पर शंकरमिश्र कहते हैं कि—केवल शाखारूप विशेषण से ही वटवृक्ष में वर्तमान कपिसंयोग को 'न्यग्रोधितरौ' वटवृक्ष में 'कपिसंयोग' वानर का संयोग है, ऐसा अनुभव होता है। यदि आग्रभागरूप विशेषण ही को लेकर संयोग सिद्ध होता है तो वृक्ष में रहनेवाला संयोग तो अन्यथा सिद्ध होता है। ऐसी शंका करो तो शंकरमिश्र कहते हैं कि—विशेषणाभास से अन्यथासिद्धि मानें तो वह केवल परमाणुओं में होगा, ऐसा होने से उसका ग्रहण न होगा। (यदि ऐसा होने से परमाणु आदि में वर्तमान संयोग न बन सकेगा क्योंकि दशा आदि व्यापक द्रव्यों के प्रदेशरहित होने से उसके विशेषण नहीं होते। ऐसी शंका हो तो शंकरमिश्र कहते हैं कि)—व्यापक दिशा आदि द्रव्यों का भी उपाधि में ही प्रदेश होता है उस विशेषण से वर्तमान संयोग भी व्याप्य वृत्ति होता है, परमाणुओं में वर्तमान भी संयोग के दिशा आदि द्रव्य विशेषण (अवच्छेदक—व्यावर्तक) होते हैं यह विचार कर लेना चाहये॥ ९॥

विभाग नामक गुण में भी संयोग गुण की उत्पत्ति के प्रकार का सूत्रकार अतिदेश करते हैं—

पदपदार्थ—एतेन = इस (संयोग की उत्पत्ति वर्णन) से, विभागः अपि = विभाग गुण भी, व्याख्यातः = व्याख्या किया गया॥ १०॥

भावार्थ—संयोग के समान विभाग भी दो मे से एक की क्रिया से उत्पन्न (१) दो द्रव्यों की किया से उत्पन्न (२) तथा विभाग से उत्पन्न (३) ऐसा तीन प्रकार का जानना॥ १०॥

उपस्कार—संयोग के समान विभाग गुण भी अन्यतर क्रिया से उत्पन्न, दोनों की क्रिया से उत्पन्न तथा विभागजन्य ऐसा तीन प्रकार का होता है। जिनमें से प्रथम का श्येन (बाज) की क्रिया से उत्पन्न वृक्ष तथा श्येनविभाग उदाहरण है तथा मिले

चायं कर्मोत्पत्त्यव्यवहितक्षणोत्पत्तिकः अपेक्षणीयान्तराभावात्। तदुक्तं— "संयोगविभागयोरनपेक्षकारणं कर्म" इति। विभागे जननीये आश्रयः, संयोगे च जननीये पूर्वसंयोगनाशश्चापेक्षणीय इति चेन्न स्वोत्पत्त्यन्तरोत्पत्तिकभावभूतानपेक्षत्वस्य कर्मणो निरपेक्षत्वात्। विभागजस्तु विभागो द्विविधः कारणमात्रविभागजकारणाकारणविभागभेदात् कारणाकारणविभागजकार्याकार्यविभागभेदाच्च। तत्र कारणमात्रविभागात् कारणाकारणविभागो यथा— कपालद्वयविभागात् कपालाकाशविभागः। कारणाकारणविभागाच्च कार्याकार्यविभागो यथा—ऽङ्गुलीतरुविभागाद्धस्ततरुविभागस्ततः शरीरतरुविभाग इति।

ननु विभाग एव न प्रमाणं संयोगाभाव एव विभागव्यवहारादिति चेन्न संयोगाभावोऽत्यन्ताभावश्चेत् गुणकर्मणोरपि विभागव्यवहारप्रसङ्गात्। द्रव्ययोर्वर्त्तमानः संयोगात्यन्ताभावो विभक्तप्रत्ययहेतुरिति चेन्नावयवावयविनोरपि

हुए मल्ल (पहलवान्) अथवा दो मिले हुए मेष (मेढ़ों) की क्रिया से उत्पन्न उन दोनों मल्ल अथवा मेषों का विभाग द्वितीय का उदाहरण है। वह यह विभाग गुण क्रिया की उत्पत्ति के व्यवधानरहित द्वितीय क्षण में उत्पन्न होता है, क्योंकि उसे दूसरे किसी की अपेक्षा नहीं करनी होती। यही कहा है—'संयोगविभागयोरनपेक्षं कारणं कर्म' अर्थात् संयोग तथा विभाग दोनों को उत्पन्न करने में क्रिया अनपेक्षकारण होती है ऐसा। 'विभाग को उत्पन्न करने में आधार द्रव्य तथा संयोग को उत्पन्न करने से पूर्वसंयोगनाश की तो क्रिया की अपेक्षा होती है' ऐसी पूर्वपक्षी शंका न करे, क्योंकि क्रिया की उत्पत्ति के पश्चात् उत्पन्न होनेवाले भावपदार्थ की अपेक्षा न करना यह कर्मपदार्थ में निरपेक्षता होती है (आधार द्रव्य पहिले ही उत्पन्न है, पूर्वसंयोग नाशभावरूप नहीं है अतः दोष न होगा)। तृतीय विभागजन्य विभाग केवल कारण के विभाग से उत्पन्न, कारण, अकारण के विभाग तथा कारण और अकारण के विभाग से उत्पन्न कार्य और अकार्य का विभाग इस भेद से। उनमें से कारणमात्र के विभाग से होनेवाला कारण और अकारण का विभाग होता है, जैसे दो कपालों के विभागों से कपाल और आकाश का विभाग। अंगुली तथा वृक्ष के विभाग से हस्त तथा तरु के विभाग और उससे शरीर तथा वृक्ष का विभाग यह कारण तथा अकारण के विभाग से कार्य तथा अकार्य के विभाग का उदाहरण है।

'विभाग नामक गुण में ही कोई प्रमाण नहीं है, संयोग के अभाव में ही विभाग का व्यवहार मान लेंगे' इस पूर्वपक्षी की शंका के उत्तर में शंकरमिश्र कहते हैं—ऐसा नहीं हो सकता यदि यह संयोग का अभाव उसका अत्यन्ताभाव लिया जाय तो गुण तथा कर्म में भी विभाग का व्यवहार होने लगेगा। यदि दो द्रव्यों में वर्तमान संयोग के अत्यन्ताभाव को विभागज्ञान का कारण मानें तो यह भी नहीं हो सकता, क्योंकि ऐसा होने से अवयव तथा अवयवी इन दोनों में भी विभक्त

प्रसङ्गात्। अकार्यकारणभूतयोर्द्रव्ययोरिति चेत् विन्ध्यहिमवतोरपिस्यात्। भवत्येव तत्रेति चेन्न भ्रान्तस्य गुणकर्मणोरपि भावात् अभ्रान्तमधिकृत्य व्यवहारस्य चिन्त्यमानत्वात्। संयोगविनाशो विभाग इति चेत् एकतरसंयोगिनाशेन नष्टे संयोगे तद्व्यवहारप्रसङ्गात्। संयोगिनोर्विद्यमानयोरिति चेत् एकसंयोगनाशानन्तरं पुनः संयुक्तयोः कुवलामलकयोः संयोगदशायामपि विभक्तप्रत्ययप्रसङ्गात् तत्र यावदर्थाभावात्। तस्मादस्ति विभागोऽर्थान्तरम्।

स च गुणः विरोधिगुणान्तरनाश्यः' विरोधिनं समानाधिकरणं गुणमन्तरेण सत्याश्रये गुणनाशानुपपत्तेः। कर्मव संयोगनाशकं स्यादिति चेन्न विरोधिनोगुणस्य गुणनाशकत्वात्। किञ्च यत्राङ्गुलीहस्तभुजशरीराणां स्वस्वकर्मणा तरुसंयोगस्त-

---

व्यवहार होने लगेगा। कार्य तथा कारण से भिन्न दो द्रव्यों में वर्तमान संयोगात्यन्ताभाव को विभाग कहें, तो यह भी नहीं हो सकता, क्योंकि ऐसा मानने से विन्ध्य तथा हिमालय पर्वत में भी कार्यकारण से भिन्न होने के कारण दोनों पर्वतों का विभक्त हुए हैं ऐसा ज्ञान होने लगेगा। यदि कहो कि दोनों पर्वतों में विभक्त हैं ऐसा ज्ञान होता ही है, तो भ्रम से गुण तथा कार्य में भी विभक्त प्रत्यय होता है (अर्थात् गुणकर्म के समान भ्रम से ही विन्ध्य तथा हिमालय में विभक्त प्रत्यय होता है) मात्र पुरुष को छोड़कर वास्तविक व्यवहार का ही विचार किया जा रहा है। यदि संयोग का नाश विभाग होता है ऐसा कहो तो होने से किसी एक संयोगी का नाश होने के कारण संयोग का नाश होने पर विभाग का व्यवहार होने लगेगा। यदि विद्यमान दो संयोगियों का ऐसा कहो तो एक संयोग गुण के नाश के पश्चात् पुनः परस्पर में संयुक्त कुवल तथा आमलक दोनों के संयोग की अवस्था में भी ये दोनों विभाग हैं ऐसा व्यवहार होने लगेगा। क्योंकि उसमें 'यावत्' जितने इस अर्थ का अभाव है। इस कारण विभाण गुण भी एक अधिक गुणरूप दूसरा पदार्थ है। (द्रव्य के असमवायिकारण में वर्तमान न होते हुए एकमात्र में वर्तमान न रहनेवाली गुणत्व की साक्षात् व्याप्य विभागत्व जाति का आश्रय होना ही विभागगुण से विभागत्व है। तथा संयोगत्व, दो मात्र में वर्तमान गुणत्व की साक्षात् व्याप्य जाति से भिन्न है, जाति होने से घटत्व जाति के समान, इस अनुमान से भी विभागगुण में अर्थान्तरत्व सिद्ध होता है)।

वह विभाग गुण विरोधी दूसरे संयोगरूप गुण से नष्ट होता है, क्योंकि एक आश्रय में वर्तमान दूसरे विरोधी गुण के विना आधार द्रव्य के रहते गुण पदार्थ का नाश नहीं होता 'क्रिया ही संयोग की नाशक क्यों न मानें' ऐसा पूर्वपक्षी नहीं कह सकता। क्योंकि विरोधी गुण ही गुण का नाशक होता है। और भी जहां अंगुली, हस्त, भुजा तथा शरीरों का अपनी-अपनी क्रिया से वृक्ष के साथ

त्राङ्गुलीमात्रे समुत्पन्नेन कर्मणाऽङ्गुलीतरुसंयोगनाशसम्भवेऽपि हस्ततरुभुजतरु-
शरीरतरुसंयोगानामनाशप्रसङ्गात् हस्तादीनामक्रियत्वात् अङ्गुलीकर्मणश्च व्यधि-
करणत्वात्। व्यधिकरणस्यापि कर्मणः संयोगनाशकत्वे क्वचिदप्युत्पन्नेन कर्मणा
युगपदेव सर्वसंयोगनाशापत्तेः। त्वन्मते तत्र का गतिरिति चेत् अङ्गुलीतरुवि
भागेन हस्ततरुविभागो जनितो हस्ततरुसंयोगनाशक इत्यभ्युपगमात्। 'व्यधि-
करणेनाङ्गुलीकर्मणैव हस्ततरुसंयोगनाशोऽस्तु, न चातिप्रसङ्गः आश्रयाश्रितपर-
म्परासंयोगस्यैव व्यधिकरणकर्मनाश्यत्वाभ्युपगमादिति' सर्वज्ञेन यदुक्तम्, तदपि
न युक्तं–विरोधिनःसमाधिकरणस्यैव सर्वत्र नाशकत्वानुभवात् बाधकमन्तरेण तत्प
रित्यागानुपपत्तेः। शब्दविभागौ च विभागकार्यौ, तत्र विभागस्य शब्दासमवा-
यिकारणत्वं मृष्यामहे,न हि वंशे पाट्यमाने दले च चरणयन्त्रणावष्टब्धे दलान्तरे-
चोपरिकृष्यमाणे यः शब्दो जायते तत्र दलाकाशविभागादन्यदसमवायिकारणं

संयोग होता है वहां केवल अङ्गुली मात्र में उत्पन्न क्रिया से अंगुली तथा वृक्ष के संयोग का नाश हो सकने से भी हस्त तथा वृक्ष, भुजा और वृक्ष एवं शरीर तथा वृक्षों के संयोगों का नाश होवेगा, क्योंकि हस्तादियों में क्रिया नहीं है और अंगुली की अपने आश्रय में न होने से व्यधिकरण है। यदि व्यधिकरण (समानाश्रय नहीं) ऐसी अंगुलि की क्रिया को हस्तादिवृक्ष संयोगों का नाशक माना जाय तो कही भी उत्पन्न हुई क्रिया से एक काल ही में सम्पूर्ण प्रदर्शित संयोगों का नाश होने लगेगा। 'व्यधिकरण अंगुली की क्रिया से ही हस्त तथा वृक्ष को संयोग का नाश होता है, आश्रय (हस्त) में आश्रित भुज से वर्तमान (भुजवृक्ष संयोग) ऐसे परम्परा से संयोग ही का व्यधिकरण अंगुली की क्रिया से नाश होता है'। ऐसा मानने से पूर्वोक्त अतिप्रसंग दोष भी न होगा, ऐसा जो भासर्वज्ञ विद्वान् का यहां मत है, वह भी असंगत है—क्योंकि विरोधी एक आश्रय में वर्तमान ही सम्पूर्ण स्थलों में नाशक होता है ऐसा अनुभव होता है जिसका विना बाधक के त्याग नहीं किया जा सकता। (कार्य से कारण का अनुमान दिखाते हुए शंकरमिश्र कहते हैं कि)—शब्द तथा विभाग शब्द के कार्य होते हैं, उसमें विभाग शब्द का असमवायिकारण होता है यह तो हम मान सकेंगे, क्योंकि वंश (बांस) को बीच में से फाड़ने के समय एक दल (भाग) को चरण से नियन्त्रण (दबा रखने) से तथा दूसरे दल (भाग) को ऊर्ध्वदेश में खींचने के समय जो ध्वनि शब्द (आवाज) होती है उसमें बांस को दोनों दलों के बीच के आकाशप्रदेश के विभाग को छोड़कर दूसरा कोई असमवायिकारण हमें नहीं दीखता और अरण्य में दावाग्नी से जलकर फटने वाले वेणु (बांस) वृक्षों के चीत्कार (फटने की ध्वनि) में विभाग को छोड़कर

पश्यामः। न च दवदहनदह्यमानस्फुटद्वेणुचीत्कारे विभागातिरिक्तमसमवायिकारणं पश्यामः। कारणाकारणविभागाच्च कार्याकार्यविभागमनुमन्यामहे कथमन्यथा स्वस्वकर्मजनिताङ्गुलीतरुसंयोगहस्ततरुसंयोगभुजतरुसंयोगशरीरतरुसंयोगानामङ्गुलीमात्रोत्पन्नकर्मणाऽङ्गुलीतरुविभागे सति अङ्गुलीतरुसंयोगनाशे सत्यपि हस्ततरुसंयोगादीनां नाशः, तत्र हि विभागजविभागपरम्परैव तत्तत्संयोगनाशिकेत्युक्तत्वात। कारणद्वयविभागपूर्वके तु कारणाकारणविभागे न संप्रत्ययः यतो वंशदले यदुत्पन्नं कर्म तेन दलान्तरविभागवदाकाशादिविभागस्यापि जननसम्भवात् यावद्भिः संयुक्तमासीत् तावद्भिस्तत्कर्मणा विभागस्य दर्शनात्, न ह्यङ्गुल्यामुत्पन्नेन कर्मणाऽङ्गुल्यन्तरविभागवदाकाशादिदेशेभ्योऽपि विभागा न जन्यन्ते कमलदले चोत्पन्नेन कर्मणा दलान्तरविभागवदाकाशादिदेशेभ्यो वा न विभागा आरभ्यन्ते। द्रव्यारम्भकसंयोगाविरोधिनः शतमपि विभागानेकं कर्मारभतां यत्तु कर्म द्रव्यारम्भकसंयोगविरोधिनं विभागमारमते न तत् द्रव्यारम्भकसंयोगाविरोधिनमपि यच्च द्रव्यारम्भकसंयोगाविरोधिनं न तद् द्रव्यारम्भकसंयोगविरोधिनमिति ब्रूमः। कुत एतदिति चेत् कार्य्यवैचित्र्येण कारणवैचित्र्यस्यावश्यकत्वात्। ननु कर्मणि वैचित्र्यमावश्यकं तथाचैकं कर्म द्रव्यारम्भकसंयोगविरोधिनं विभागं जनयतु यथा विकसत्कमलकुड्मलादावपरञ्च द्रव्यारम्भकसंयोगविरोधिनमविरोधिनञ्चोभयमिति। मैवम्,

---

दूसरा कोई असमवायिकारण भी नहीं हमें दिखता) तथा कारण और अकारण के विभाग से कार्य तथा अकार्य के पूर्वप्रदर्शित विभाग को भी हम मानते हैं, ऐसा न हो तो अपनी-अपनी क्रिया से उत्पन्न अंगुली तथा वृक्ष का संयोग एवं हस्त तथा वृक्ष का संयोग, भुज और वृक्ष का संयोग तथा शरीर वृक्ष संयोगों का अंगुली मात्र में उत्पन्न क्रिया से अंगुली तथा वृक्ष का विभाग होने पर अंगुली तथा वृक्ष का संयोग नष्ट होने पर भी हस्त तथा वृक्ष आदि संयोगों का नाश कैसे होता है, क्योंकि उसमें विभाग से उत्पन्न विभाग की परंपरा ही उन संयोगों की नाशक होती है ऐसा कहा है,। किन्तु दो कारणों के विभाग से उत्पन्न होनेवाले कारण तथा अकारण के विभाग में विश्वास नहीं होता क्योंकि पूर्वोक्त वंश (बांस) के एक हिस्से में उत्पन्न जो क्रिया उससे दूसरे दल (भाग) के विभाग के समान आकाशादि प्रदेश से भी विभाग की उत्पत्ति हो सकती है, क्योंकि जितनों के साथ संयोग था उतनों से उस क्रिया से विभाग होता है यह देखने में आता है, क्योंकि अंगुली में उत्पन्न क्रिया से दूसरे अंगुलियों से विभाग के समान आकाशादि प्रदेशों से भी विभाग उत्पन्न नहीं होते। यह नहीं होता, तथा कमल के दल (पत्तों) में उत्पन्न क्रिया से दूसरे दल से विभाग के समान आकाशादि प्रदेशों से विभाग नहीं होते यह भी नहीं होता। एक क्रिया द्रव्य के उत्पादक

कार्य्यविरोधो हि कारणवैचित्र्यकल्पनामूलं स च विरोधः एकस्य द्रव्यारम्भकसंयोगप्रतिद्वन्द्वित्वेन, अपरस्य तु तद्प्रतिद्वन्द्वित्वेनेति तथैव वैचित्र्यस्यापि कल्पनौचित्यात्। तच्चेदं वंशदले वर्तमानं कर्म दलद्वयविभागमात्रं जनयति, स च विभागोऽग्रे आकाशादिदेशाद्विभागं द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विनं विभागमारभते, तस्य च निरपेक्षस्य विभागजनने कर्मत्वापत्तिरिति द्रव्यनाशविशिष्टं

संयोगों के विरोधी सैकड़ों विभागों को उत्पन्न करे, किन्तु जो क्रिया द्रव्य के उत्पादक संयोग के विरोधी अर्थात् द्रव्यनाशक विभाग को उत्पन्न करती है वह क्रिया द्रव्यारम्भक संयोग के न विरोध करनेवाले विभाग को भी उत्पन्न करती है, और जो द्रव्य के आरम्भक संयोग के विरोध न करनेवाले विभाग को उत्पन्न करती है, वह द्रव्य के उत्पादक संयोग के विरोधी विभाग को उत्पन्न नहीं करती है, ऐसा शंकरमिश्र कहते हैं। हमारा मत है, ऐसा क्यों ? इस प्रश्न के उत्तर में कार्य की विचित्रता से कारण की विचित्रता मानना आवश्यक है यह उत्तर है। वह आरम्भक संयोग विरोधी विभाग के जनक को उसके विरोधी केवल विभागमात्र की जनकता, कुछ उसके विरोधी केवल विभागमात्र की जनकता है। क्योंकि खिलनेवाली कमल की कली आदि में कमल द्रव्य के उत्पादक संयोग के अविरोधी विभाग की जनक क्रिया आरम्भक संयोग के विरोधी विभाग को उत्पन्न नहीं करती, नहीं तो खिलती हुई कमल की कली नष्ट हो जायगी यह आशय है। ऐसा होने से वंशदल की क्रिया यदि बांस द्रव्य के उत्पादक संयोग के विरोधी वंशदल तथा आकाशप्रदेश के विभाग को उत्पन्न करेगी, तो दोनों दलों के विभाग को उत्पन्न न करेगी, क्योंकि वह बाँस द्रव्य के उत्पादक संयोग की विरोधी है यह यहाँ आशय है। इस शंकरमिश्र के मत पर--'कर्म में विचित्रता मानना आवश्यक है, ऐसा होने से एक कर्म द्रव्य के उत्पादक संयोग को उत्पन्न करे, जैसे खिलती हुई कमल की कली आदि में और दूसरा कर्म द्रव्य के उत्पादक संयोग के विरोधी, एवं अविरोधी दोनों विभागों को उत्पन्न करे' अर्थात् ऐसा होने से वैसा ही वैचित्र्य होगा। ऐसी यदि पूर्वपक्षी शंका करे तो शंकरमिश्र कहते हैं, ऐसा नहीं, क्योंकि कार्य का विरोध ही कारण के विचित्र मानने का मूल कारण होता है, और वह विरोध एक में द्रव्य के उत्पादक संयोग की विरोधिता से, और दूसरे में उसके अविरोधी संयोग की विरोधिता से इस कारण उसी प्रकार से वचित्र्य मानना भी उचित है (ऐसा वैचित्र्य कल्पना करने पर भी विरुद्ध कार्य को उत्पन्न करना रूप विरोध नहीं होता यह समाधान का तात्पर्य है)। (आगे शंकरमिश्र कहते हैं कि)—वह यह वंशदल में क्रिया केवल दोनों वंशदलों के दोनों भागों के विभाग को उत्पन्न करती है, और वह विभाग अग्र में आकाशादि प्रदेश से विभाग को जो द्रव्य के उत्पादक

कालमपेक्षते । ननु तदानीमपि कर्मैव तज्जनयतु अतीतकालत्वात् विभागजनने कर्मणः स्वोत्पत्त्यनन्तर एव कालः । नन्वेवं विभागेन जनिते विभागान्तरे कर्म प्रदेशान्तरसंयोगमपि न जनयेत्, न संयोगजननं प्रति कर्मणोऽनतीतकालत्वात् अन्यथा कर्म न नश्येदेव तस्योत्तरसंयोगमात्रनाश्यत्वात् ।

सोऽयं विभाग उत्तरसंयोगनाश्यः क्षणत्रयस्थायी । क्वचिदाश्रयनाशनश्यः, तद् यथा—तन्तोरवयवेंऽशौ कर्म तदनन्तरमंशुद्वयविभागस्तदैव तन्त्वन्तरे कर्म ततोंऽशुद्वयविभागेन तन्त्वारम्भकसंयोगनाशस्तन्तुकर्मणा च विभागस्ततो द्रव्यारम्भकसंयोगनाशात्तन्तुनाशस्तन्नाशाच्च तन्त्वन्तरकर्मजन्यविभागनाशः । नन्वेवं तन्त्वन्तरोत्पन्नस्य कर्मणो न नाशः स्याद्विनाशकाभावात् उत्तरसंयोगेन हि कालमपेक्षते । ननु तदानीमपि कर्मैव तज्जनयतु, अतीतकालत्वात् विभागजननं

संयोग का विरोधी नहीं है उत्पन्न करता है, यदि वह निरपेक्ष (किसी की अपेक्षा न करता हुआ) विभाग को उत्पन्न करे, तो वह पूर्वोक्त कर्म लक्षण आने से कर्म हो जायगा इस कारणवस द्रव्य के नाशवाले समय की अपेक्षा करता है । 'उस समय भी क्रिया ही उस विभाग को उत्पन्न करे, इसमें क्या दोष है' ऐसी पूर्वपक्षी शंका नहीं कर सकता, क्योंकि क्रिया का अपने कार्य को करने का समय व्यतीत हो गया है, क्योंकि विभाग को उत्पन्न करने में क्रिया का अपनी उत्पत्ति का अग्रिम ही क्षण काल होता है । 'इस प्रकार से तो एक विभाग से दूसरे विभाग के उत्पन्न होने पर किया दूसरे देश के साथ उत्तर संयोग को भी न करेगी' । ऐसी शंका नहीं हो सकता क्योंकि उत्तरदेश के साथ संयोग को उत्पन्न करने में क्रिया का काल व्यतीत नहीं हुआ है, अन्यथा ऐसा न हो तो क्रिया का नाश ही न होगा, क्योंकि वह क्रिया केवल उत्तरदेश के संयोग ही से नष्ट होती है ।

वह यह विभागगुण उत्तरसंयोग से नष्ट होता है तथा तीन क्षण तक स्थिर रहता है । कहीं-कहीं आधार द्रव्य के नाश से भी नष्ट होता है, वह ऐसा कि तन्तु के अवयव अंशु में क्रिया होती है, इसके पश्चात् दोनों अंशुरूप अवयवों में विभाग होता है, उसी समय दूसरे तन्तु में क्रिया उत्पन्न होती है, पश्चात् दोनों अंशुओं के विभाग से तन्तु का उत्पादक पूर्वसंयोग नष्ट होता है और दूसरे तन्तु की क्रिया से विभाग होता है, पश्चात् तंतु द्रव्य के उत्पादक संयोग के नाश से तन्तु द्रव्य का नाश होता है, और उसके नाश से ही दूसरे तन्तु भी क्रिया से उत्पन्न विभाग का नाश हो जाता है । यदि 'ऐसा होने से दूसरे तन्तु में उत्पन्न क्रिया का नाश न होगा, क्योंकि उसका नाश करनेवाला ही नहीं है, उत्तरसंयोग से ही उसका नाश हो सकता है, और जब विभाग नष्ट ही हो गया तो उत्तरसंयोग कहां है?' ऐसी शंका करो तो यह भी ठीक नहीं है, क्योंकि तन्तु में जो क्रिया उत्पन्न हुई उससे जिस प्रकार विनाशावस्था में प्राप्त तन्तु का विभाग उत्पन्न हुआ इसी प्रकार उसके अंशु का विभाग

तन्नाश्येत, विभागे च नष्टे नोत्तरसंयोग इति चेन्न तन्तौ यत् कर्मोत्पन्नं तेन यथा विनश्यदवस्थतन्तोर्विभागो जनितस्तथा तदंशोरपि विभागो जननीयः सोऽप्यारम्भकसंयोगाविरोध्येव तेनांशुतन्तुविभागेन तन्त्वाकाशविभागस्तेन चोत्तरसंयोगस्तेनततः कर्मनाशः। यद्वा यत्र तन्तौ यदा कर्म तदंशावपि तदैव कर्म तच्च कर्म विनश्यदवस्थतन्तुतदवयवाकाशादिदेशाद्युगपदेव विभागानारभते सर्वेषां विभागानामारम्भकसंयोगाविरोधित्वात्, तथा च कारणमंशुरकारणञ्चा काशादि तद्विभागात् कार्यस्य तन्तोरकार्येणाकाशादिना यो विभाग उत्पन्नस्तद नन्तरोत्पत्तिकेन संयोगेन तन्तुसमवेतस्य कर्मणो विनाश इति। कश्चिद्द्वाभ्यां, तद् यथा—तन्तुवीरणयोः संयोगे सति तन्त्ववयवेंऽशौ कर्मवीरणे च कर्मेत्येकः कालः, अंशुकर्मणांऽश्वन्तरविभागस्तेन च संयोगस्य तन्त्वारम्भकस्य विनाशः वीरणकर्मणा च तन्तुवीरणविभागस्तन्तुवीरणसंयोगनाशश्च तन्त्वारम्भकसंयोगनाशश्च तन्त्वारम्भकसंयोगनाशानन्तरं तन्तुनाशस्तन्तुवीरणसंयोगनाशानन्तरं वीरणस्य प्रदेशान्तरसंयोगस्ताभ्यामाश्रयनाशसंयोगाभ्या विभागनाशः ॥ १० ॥

उत्पन्न करेगा, और वह भी उत्पादक संयोग का विरोधी ही है, उसे अंशु तथा तन्तु के विभाग से तन्तु का आकाश प्रदेश से विभाग होगा, और उससे उत्तरसंयोग होगा, और उससे क्रिया का नाश होगा। अथवा जिस तन्तु में जिस समय क्रिया होती है, उसके अंशु में भी उसी समय क्रिया होती है, और वह क्रिया विनाशावस्था प्राप्त तन्तु उसके अवयव तथा आकाशादि प्रदेश से एक ही काल में विभागों को उत्पन्न करती है क्योंकि ये सम्पूर्ण विभाग द्रव्य के उत्पादसंयोग के विरोधी नहीं हैं, ऐसा होने से अंशुरूप तन्तु द्रव्य का कारण तथा आकाशादिरूप अकारण इनके विभाग से तन्तुरूप कार्य तथा आकशादि प्रदेशरूप अकार्य इनके साथ जो विभाग उत्पन्न हुआ, और उसके उत्तरक्षण में उत्पन्न संयोग से तन्तु द्रव्य में समवेत क्रिया का नाश होता है, इस प्रकार आश्रयनाश से विभागनाश की प्रक्रिया है।

कहीं-कहीं आश्रयनाश तथा उत्तरसंयोग इन दोनों से विभाग का नाश होता है, वह जैसे तन्तु तथा वीरण का संयोग होने पर तन्तु के अवयव अंशु में तथा वीरण में भी एक ही काल में क्रिया होती है, पश्चात् अंशु की क्रिया से दूसरे अंशु का विभाग होता है, और उससे तन्तु द्रव्य के उत्पादक पूर्वसंयोग का नाश तथा वीरण की क्रिया से तन्तु और वीरण का परस्पर विभाग और तन्तु तथा वीरण के पूर्वसंयोग का नाश और तन्तु द्रव्य के उत्पादक संयोग का नाश भी होता है, और तन्तु के उत्पादक संयोग के नाश के पश्चात् तन्तु द्रव्य का नाश होता है, और तन्तु तथा वीरण के संयोग के नाश के पश्चात् वीरण का दूसरे देश में संयोग होता है, इस प्रकार आश्रयनाश तथा उत्तरदेशसंयोग दोनों से विभाग का नाश होता है ॥ १० ॥

ननु संयोगेऽपि संयोगोऽस्तु विभागेऽपि विभाग इति प्रसङ्गनिवारणार्थमाह—

संयोगविभागयोः संयोगविभागाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः ॥ ११ ॥

यथाऽणुत्वमहत्त्वे नाणुत्वमहत्त्ववती तथा संयोगविभागौ न संयोगविभागवन्तौ ॥ ११ ॥

कर्मभिः कर्माणि गुणैर्गुणा अणुत्वमहत्त्वाभ्यामिति ॥ १२ ॥

द्वितीयञ्च सूत्रं व्याख्यातमेव ॥ १२ ॥

ननु द्रव्ययोरवयवावयविनोः संयोगः कथं नेत्यत आह—

'संयोग में संयोग तथा विभाग में भी विभाग क्यों नहीं रहता' इस पूर्वपक्षी की आपत्ति के निवारणार्थ सूत्रकार कहते हैं—

पदपदार्थ—संयोगविभागयोः = संयोग तथा विभाग दोनो में, संयोगविभागाभावः=संयोग तथा विभाग का न रहना, अणुत्वमहत्वाभ्यां=अणु में अणु तथा महत् में महत् परिमाण न रहने से, व्याख्यातः = व्याख्या किया गया ॥ ११ ॥

भावार्थ—जिस प्रकार अणुपरिमाण में दूसरा अणुपरिमाण और एक महत्परिमाण में दूसरा महत्परिमाण नहीं रहता उसी प्रकार से संयोग तथा विभाग में संयोग और विभाग नहीं रहते ॥ ११ ॥

उपस्कार—जिस प्रकार एक अणु तथा महत्परिमाण दूसरे अणु तथा महत्परिमाण के आश्रय नहीं होते उसी प्रकार एक संयोग तथा विभाग दूसरे संयोग तथा विभागगुणवाले नहीं होते ॥ ११ ॥

पदपदार्थ—कर्मभिः = कर्मपदार्थों से, कर्माणि कर्मपदार्थ, गुणैर्गुणा गुणों से गुण पदार्थ, अणुत्वमहत्वाभ्यां = अणु तथा महत्परिमाणों से, इति=इस प्रकार व्याख्या किये गये ॥ १२ ॥

भावार्थ—एक क्रिया में दूसरी क्रिया तथा एक गुण में दूसरे गुण नहीं रहते, यह भी एक अणुपरिमाण में दूसरा अणुपरिमाण और एक महत्परिमाण में दूसरा महत्परिमाण नहीं रहता, इससे व्याख्या किया जाता है ॥ १२ ॥

उपस्कार—इस दूसरे सूत्र की व्याख्या हो गयी है ॥ १२ ॥

'अवयव तथा अवयविरूप दो द्रव्यों का संयोग सम्बन्ध कैसे नहीं होता' इस शंका के समाधानार्थ सूत्रकार कहते हैं—

युतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्येते ।

असम्बन्धोर्विद्यमानत्वं युतसिद्धिः पृथगाश्रयाश्रितत्वं वा तदभावस्त्ववयवावयविनोरित्यर्थः ॥ १३ ॥

इदानीं प्रसङ्गाच्छब्दार्थयोः साङ्केतिकं सम्बन्धं साधयितुं प्रकरणान्तरम्, तत्र पूर्वपक्षमाह—

गुणत्वात् ॥ १४ ॥

संयोगस्येति शेषः । तथाच गुणस्य शब्दस्य गुणः संयोगः कथं स्यात् अर्थेन घटादिनेत्यर्थः ॥ १४ ॥

पदपदार्थ—युतसिद्ध्यभावात्=पृथक् सिद्ध न होने के कारण, कार्यकारणयोः=कार्य तथा कारण दोनों का, संयोगविभागौ=संयोग तथा विभाग गुण दोनों, न विद्येते=नहीं होते ॥ १३ ॥

भावार्थ—अवयव तथा अवयवी दोनों में असम्बद्धों की विद्यमानता तथा पृथक् आधार में आश्रित होना दोनों प्रकार की युतसिद्धिः न होने के कारण संयोग तथा विभाग अवयव और अवयवी के नहीं होते ॥ १३ ॥

उपस्कार—सम्बन्धरहित दो पदार्थों की विद्यमानता को अथवा भिन्न आधार में आश्रित होना युतसिद्धि होती है अवयव तथा अवयवी इन दोनों में उसका अभाव है यह सूत्र का अर्थ है 'दो विभुद्रव्य सम्बन्धरहित होकर रहते हैं इस कारण उनकी भी युतसिद्धि हो जायगी' इस शंका के वारणार्थ द्वितीय पक्ष शंकरमिश्र ने यहाँ दिखाया है पृथक् आश्रय में आश्रित होना । जो दोनों संयोगसम्बन्ध से भिन्न आधार में रहते हैं वही दोनों युतसिद्ध होते हैं, संयोगसम्बन्ध से घट के आश्रय से कपाल का आश्रय भिन्न नहीं होता ! अतः घट और कपाल अयुतसिद्ध है, यह यहाँ आशय है ॥ १३ ॥

प्रसंगसङ्गति से सांप्रत शब्द तथा अर्थ का परस्पर में साङ्केतिक (वाच्यवाचकताभावरूप शक्ति नामक सम्बन्ध सिद्ध करने के लिये दूसरा प्रकरण सूत्रकार प्रारम्भ करते हैं । इसे पूर्वपक्ष कहते हैं—

पदपदार्थ—गुणत्वात्=संयोग के गुण होने से (शब्द का संयोगसम्बन्ध कैसे होगा) ॥ १४ ॥

भावार्थ—घटादि पदार्थों के साथ घटादि शब्द का संयोग सम्बन्ध नहीं हो सकता ॥ १४ ॥

उपस्कार—सूत्र में आकांक्षित 'संयोगस्य' इस पद का शेष भाग जोड़ना ऐसा होने से शब्दरूप गुण का संयोगसम्बन्धरूप गुण घटादि पद के अर्थ घटादिकों के साथ यह पूर्वपक्ष सूत्र का अर्थ है ॥ १४ ॥

किञ्च विषयोऽपि क्वचिद्रूपरसादिलक्षणस्तेन संयोगो न सम्भवति गुणे गुणानङ्गीकारादित्याह—

गुणोऽपि विभाव्यते ॥ १५ ॥

गुणोऽपि विषय इति शेषः। गुणोऽपि रूपादिः शब्दस्य विषयो न तु तेन समं संयोगः सम्बन्ध इत्यर्थः।

यद्वा गुणोऽपि शब्देन विभाव्यते प्रतिपाद्यते तेन च शब्दस्य न संयोगः सम्बन्ध इत्यर्थः ॥ १५ ॥

किञ्च कस्यचिदाकाशादेर्द्रव्यस्य नान्यतरकर्मजः संयोगो नोभयकर्मजः शब्दस्यापि निष्क्रियत्वादित्याह—

निष्क्रियत्वात् ॥ १६ ॥

शब्दस्य कस्यचिदर्थस्य चेति शेषः ॥ १६ ॥

और कहीं-कहीं रूप-रस आदि रूप विषय भी पद का अर्थ होता है, गुण में गुणों के न मानने के कारण, उस रूपादि अर्थ के साथ रूपादि पद का संयोगसम्बन्ध नहीं हो सकता इस आशय से पूर्वपक्षी कहता है—

पदपदार्थ—गुणः अपि = गुणरूप विषय भी, विभाव्यते = शब्द से कहा जाता है ॥ १५ ॥

भावार्थ—रूप रस आदि गुण भी रूपादि शब्दों से कहा जाता है, इस कारण गुण में गुणतः मानने से रूपादि शब्दों का रूपादि विषयों के साथ संयोगसम्बन्ध नहीं हो सकता ॥ १५ ॥

उपस्कार—रूपादि गुण भी 'विषय' हैं ऐसा शेष सूत्र में पूर्ण करना। रूप रस आदि गुण पदार्थ भी रूपादि शब्द का विषय (वाच्य) होता है, किन्तु उसके साथ संयोगसम्बन्ध नहीं होता, यह सूत्र का अर्थ है। अथवा गुण भी शब्द से विभाव्यते अर्थात् प्रतिपादित किया जाता है, उससे भी शब्द का संयोगसम्बन्ध नहीं हो सकता, यह सूत्र का अर्थ है ॥ १५ ॥

और किसी आकाश आदि द्रव्य का अन्यतर (दो में से एक की) क्रिया से, तथा दोनों द्रव्यों की क्रिया से भी संयोग नहीं हो सकता क्योंकि शब्द भी क्रियारहित है। इस आशय से पूर्वपक्षी कहता है ॥ १६ ॥

पदपदार्थ—निष्क्रियत्वात्=शब्द के निष्क्रिय (क्रियारहित)होने से ॥ १६ ॥

भावार्थ—शब्द गुण के क्रियारहित होने से उभय क्रियाजन्य भी संयोग नहीं हो सकता ॥ १६ ॥

उपस्कार—सूत्र में 'किसी शब्दरूप अर्थ से' ऐसा शेष पूरण करना। (जिससे शब्द के क्रियारहित होने के उभय क्रियाजन्य संयोग सम्बन्ध नहीं हो सकता, यह सूत्र का अर्थ जानना) ॥ १६ ॥

सम्बन्धे बाधकान्तरमाह—

असति नास्तीति च प्रयोगात् ॥ १७ ॥

असत्यपि घटपटादौ—नास्ति गेहे घटः, नास्ति पटः, श्रुतपूर्वोगकारो नास्ति, अभूत् पटः, पटो भविष्यतीत्यादिप्रयोगदर्शनादित्यर्थः। तथाचासता घटादिना शब्दस्य न संयोगो न वा समवाय इति भावः ॥ १७ ॥

किञ्चात इत्यत आह—

शब्दार्थावसम्बन्धौ ॥ १८ ॥

शब्दार्थयोः संयोगश्चेन्नास्ति तदेतदायातं—शब्दार्थावसम्बन्धावेवेत्यर्थः। ननु संयोगसमवाययोरन्यतरसम्बन्धः कथं न स्यादित्यत आह—

शब्द तथा अर्थ में दूसरा सम्बन्ध होने से दूसरा बाधक पूर्वपक्षी कहता है—

पदपदार्थ—असति = पदार्थ के न रहने पर, नास्ति इति च = नहीं है ऐसा भी, प्रयोगात् = प्रयोग होने से (शब्द तथा अर्थ का सम्बन्ध नहीं है) ॥ १७ ॥

भावार्थ—'घर में घट नहीं है' इत्यादि रूप प्रयोग घटपदार्थ के न रहने पर भी देखा जाता है। अतः असत् घटादि पदार्थ के साथ घटादि शब्द का संयोग अथवा समवायसम्बन्ध नहीं हो सकता ॥ १७ ॥

उपस्कार—घटादि पदार्थ के न रहने पर भी—'घर में घट नहीं है, पट नहीं है, पूर्व में सुनाया हुआ शब्द नहीं है, पट था, पट होगा' इत्यादि प्रयोगों के देखने से यह अर्थ है। ऐसा होने से असत् (अविद्यमान) घटादि पदार्थ के साथ शब्द का न संयोगसम्बन्ध हो सकता है, अथवा न समवायसम्बन्ध हो सकता है यह सूत्र का भाव है ॥ १७ ॥

यदि सिद्धान्ती प्रश्न करे 'कि इससे प्रकृत में क्या हुआ' तो पूर्वपक्षी कहता है—

पदपदार्थ—शब्दार्थौ = शब्द तथा अर्थ दोनों, असम्बन्धौ=सम्बन्ध-रहित है ॥ १८ ॥

भावार्थ—जब उक्त प्रकार से शब्द तथा अर्थ का संयोग अथवा समवायसम्बन्ध नहीं हो सकता, अतः शब्द तथा अर्थ का परस्पर कोई सम्बन्ध नहीं है ॥ १८ ॥

उपस्कार—जब शब्द तथा अर्थ दोनों का संयोगसम्बन्ध अथवा समवाय सम्बन्ध नहीं है, इससे यह आया कि शब्द, अर्थ तथा परस्पर सम्बन्धरहित नहीं है ॥ १८ ॥

'संयोग तथा समवाय इन दोनों में से कोई एक शब्द तथा अर्थ का परस्पर में सम्बन्ध क्यों न होगा ऐसी सिद्धान्ती शंका करे तो पूर्वपक्षी कहता है—

संयोगिनो दण्डात् समवायिनो विशेषाच्च ॥ १९ ॥

दण्डी पुरुषः-हस्ती कुञ्जर-इति प्रत्ययौ स्तः, तत्र प्रथमः संयोगात्, द्वितीयः समवायात् हस्तेऽवयवविशेषे कुञ्जरस्य समवायाधीनः प्रत्ययः। हस्तः समवायितया यस्यास्ति स हस्तीति। विशेषादिति। विशेष एव हस्तादौ समवायसम्बन्धाद्विशेषणत्वं न तु तन्त्वादीनामपि तन्तुमान् पट इत्यादिरवयवविशेषणभावेन प्रत्ययो भवति, एवं घटशब्दवान् घटोऽर्थ इति प्रत्ययो न भवति, तथाच शब्दार्थयोर्न संयोगो नापि समवाय इति भावः ॥ १९ ॥

ननु यदि न संयोगो न वा समवायः शब्दार्थयोस्तर्हि केन सम्बन्धेन शब्दो नियतमर्थं प्रतिपादयतीत्यत आह—

सामयिकः शब्दादर्थप्रत्ययः ॥ २० ॥

पदपदार्थ—संयोगिनः=संयोगसम्बन्धवाले, दण्डात्=दण्ड से, समवायिनः=समवायसम्बन्धवाले से, विशेषात् च=विशेष होने से भी ॥ १९ ॥

भावार्थ—जिस प्रकार दण्डवाला पुरुष है, हस्त (सूंडवाला) हाथी है ऐसा दोनों संयोग तथा समवायसम्बन्ध से क्रम से प्रतीति होती है इस प्रकार घट शब्दाश्रय घटरूप अर्थ है ऐसी प्रतीति नहीं होती। अतः शब्द तथा अर्थ का परस्पर संयोग अथवा समवायसम्बन्ध नहीं हो सकता ॥ १९ ॥

उपस्कार—दण्डवाला मनुष्य है,-हस्ती (सूंडवाला) कुंजर (हाथी) है। ऐसे दो प्रकार के ज्ञान होते हैं, उनमें प्रथम प्रयोग संयोगसम्बन्ध से और दूसरा प्रयोग समवायसम्बन्ध से प्रतीत होता है, क्योंकि हस्तनाम सूंड नामक विशेष अवयव में हाथी के समवायसम्बन्ध के कारण होता है। हस्त (सूंड) समवायि (समवेत) है जिससे वह हस्ती ऐसा कहाता है। सूत्र के 'विशेषात्' इस पद का यह अर्थ है कि हस्त (सूंड) आदि अवयव विशेषादिकों में ही समवायसम्बन्ध से विशेषणता है, नकि तन्तु आदि अवयवों में भी, क्योंकि 'तन्तु वाला पट है' ऐसा अवयव को विशेषण मानकर ज्ञान नहीं होता, इसी प्रकार 'घट शब्दवाला घटरूप अर्थ है' ऐसा ज्ञान नहीं होता, ऐसा होने से शब्द तथा अर्थ का परस्पर न संयोगसम्बन्ध है, अथवा न समवायसम्बन्ध है यह सूत्र का आशय है ॥ १९ ॥

यदि 'शब्द तथा अर्थ का संयोग अथवा समवाय नामक सम्बन्ध नहीं है तो किस सम्बन्ध से शब्द अर्थ का प्रतिपादन करता है।' इस शंका के उत्तर में सिद्धान्ती के पक्ष से सूत्रकार कहते हैं—

पदपदार्थ=सामयिकः=सङ्केत से होता है, शब्दात् = शब्द से, अर्थप्रत्ययः=अर्थ का ज्ञान ॥ २० ॥

सामयिक इति। समय ईश्वरसङ्केतः-अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारः, यः शब्दो यस्मिन्नर्थे भगवता सङ्केतितः स तमर्थं प्रतिपादयति, तथा च शब्दार्थयोरीश्वरेच्छैव सम्बन्धः स एव समयस्तदधीन इत्यर्थः। यथा नकुलदंष्ट्राग्रस्पृष्टा या काचिदोषधिः सा सर्वाऽपि सर्पविषं हन्ति।

स च समयः क्वचिव्द्यवहाराद् गृह्यते, यथा-प्रयोजकेन घट मानयेत्युक्ते प्रयोज्यस्य कम्बुग्रीवावन्तमर्थमानयतो ज्ञानं तावद् नुमिनोति तटस्थो बालः-इयमस्य प्रवृत्तिर्ज्ञानजन्या प्रवृत्तित्वात् मत्प्रवृत्तिवत्। तच्च ज्ञानमेतद्वाक्यजन्यमेतदनन्तरभावित्वात्. एतज्ज्ञानविषयोऽयं कम्बुग्रीवावानर्थो घटपदवाच्य इत्यावापोद्वापप्रक्रियया बालस्य घटपटादावर्थे व्युत्पत्तिः।

भावार्थ—इस शब्द से यह अर्थ जानना इस प्रकार ईश्वर की इच्छारूप संकेत (शक्ति) सम्बन्ध के अधीन शब्दों से अर्थ का ज्ञान होता है ॥ २० ॥

